

This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

Usage guidelines

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.

+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.

+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.

+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

About Google Book Search

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at `http://books.google.com/`

. o.r
477

Digitized by Google

d. or. 4477



Digitized by Google

Digitized by Google

Digitized by Google

A. Or.
4477.

BHAMINIBILASHA

A POEM

BY

JAGANNATHA PANDIT.

EDITED WITH NOTES

BY

TARANATHA TARKAVACHASPATI
Professor of Grammar, Govt. Sanskrit College.



Calcutta:

THE KAVYAPRAKASA PRESS.

1872

To be had from Pandit Jibananda Vidyasagara B. A. Govt. Sanscrit College of Calcutta.

Digitized by Google

A.or.
4477

Jagannatha

Digitized by Google

भामिनीविलासः

श्रीमत्पण्डितराजजगन्नाथविरचितः ।



गवर्णमेण्टसंस्कृतविद्यालयाध्यापक-
श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्य्येण कृत-
सञ्जिप्तटीकासमेतः, तेनैव संस्कृतः ।

कलिकातानगर्याम्
काव्यप्रकाशयन्त्रे
मुद्रितः ।

शकाब्दाः १७९२ । खृ० १८७२ ।

Digitized by Google

BIBLIOTHECA
REGIA
MONACENSIS

Digitized by Google

ओं नमो गणेशाय ।

* भामिनीविलासम् ।

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः (१)
करिण्यः कारुण्यास्पदमसमशीलाः (२) खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां (३) पुनरयं
नखानां पाण्डित्यं (४) प्रकटयतु कस्मिन् ? मृगपतिः ॥ १ ॥
पुरा सरसि मानसे विकचसारसालि-(५)स्खलत्-
परागसुरभीकृते पयसि यस्य वीतं वयः ।

सर्व्वोपनिषदां सारं संसारार्णवतारकम् ।
स्मरामि चेतसा नित्यं परमात्मानमीश्वरम् ॥
जनस्नाथपण्डितेन्द्र-रचितं वदनुत्तमम् ।
अन्योक्तिप्रचुरं वक्ष्ये प्राचुर्य्यपरिवर्जितम् ॥
बुधतृप्तानां बोधनाय श्रीतारानाथशर्म्मणा ।
तद्भामिनीविलासाख्यं काव्यं व्याख्यायते मनाक् ॥

* भामिन्याः स्वभार्य्यायाः विलासमधिकृत्य तदधिकृत्य कृते ग्रन्थे इत्यर्थः ।
(१) करटिनः कृष्णिनः दिगन्ते श्रूयन्ते इत्यनेन तेषां भद्रात् पलायनं ध्वन्यते ।
(२) कारुण्यविषयत्वे हेतुः स्त्रीत्वम्, "अवध्यास्तु स्त्रियं प्राहुस्त्रिर्य्यग्योनिगतामपि" इति स्मृतेस्तया अवध्यत्वम् । असमशीलाः अतुल्यस्वभावाः ।
(३) अनुपमशिखानां तीक्ष्णाग्राणामित्यर्थः ।
(४) पाण्डित्यं विदारणरूपस्वकार्य्यनैपुण्यम् ।
(५) सारसादिः पद्मश्रेष्ठी ।

Digitized by Google

स पल्वल-(१)जलेऽधुना मिलदनेकभेकाकुले
मरालकुल-(२)नायकः कथय रे कथं वर्त्तताम् ? ॥ २ ॥
दृशालोलविलोचने कलयति प्राचीं चकोरीगणे(३)
मौनं मुञ्चति किञ्च कैरवकुले कामे धनुर्धुन्वति ।
माने मानवतीजनस्य सपदि प्रध्वातुकामेऽधुना
धातः ! किन्नु विधौ विधातुमुचितो धाराधराडम्बरः ॥ ३ ॥
अयि दलदरविन्द ! स्यन्दमानं मरन्दं (४)
तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः ।
दिशि दिशि निरपेक्षास्तावकीनं विदूरान्
परिमलमयमन्यो(५) बान्धवो गन्धवाहः ॥ ४ ॥
समुपागतवति दैवादवहेलां कुटज ! मधुकरे मा गाः ।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ॥ ५ ॥
तावत् कोकिल ! विरसान् यापय दिवसान् वनान्तरे निवसन् ।
यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति ॥ ६ ॥
कमलिनि ! मलिनीकरोषि चेतः
किमिति ? वकैरवहेलितानभिज्ञैः ।

---

(१) पल्वलं क्षुद्रसरोवरः । (२) मरालकुलं हंसकुलम् ।
(३) चकोरीगणे प्राचीं कलयति औत्सुक्येन वीक्षमाणे सतीत्यर्थः ।
(४) मरन्दं मकरन्दम् लिहन्तः आस्वादयन्तो भृङ्गाः किमपि ? गुञ्जन्तु ।
(५) भृङ्गाणां मकरन्दलाभेन कृत्रिमबन्धुत्वं गन्धवाहस्य तु उपकारलाभाभावेन सहजबन्धुत्वमिति वैचित्र्यं द्योतयितुं निरपेक्ष इति उक्तस्य अन्यबन्धुत्वं कृत्रिममभिन्नबन्धुत्वमिति भावः ।

Digitized by Google

परिणतमकरन्दमार्म्मिका (१) खे
जगति भवन्तु चिरायुषो मिलिन्दाः (२) ॥ ७ ॥
नितरां नीचोऽस्मीति (३) त्वं खेदं कूप ! मा कदापि कृथाः।
अयमन्तं सरसहृदयो (४) यतः परेषां गुणग्रहीतासि ॥ ८ ॥
येनामन्दमरन्दे दलदरविन्दे दिनान्यनायिषत।
कुटजे खलु तेनेहा (५) तेने हा मधुकरेण कथम् ? ॥ ९ ॥
अयि मलयज ! महिमायम् कस्य गिरामस्तु विषयस्ते।
उद्गिरतो यद्गरलं फणिनः पुष्णासि परिमलोद्गारैः ॥ १० ॥
पाटीर !(६) तव पटीयान् कः परिपाटीमिमामुरीकर्त्तुम् ?।
यत् पिंषतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम् ॥ ११ ॥
नीरक्षीरविवेके हंसालसमालस्यं त्वमेव तनुषे चेत्।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः ? ॥ १२ ॥
उपरि करवालधाराकाराः क्रूरा भुजङ्गमपुङ्गवाः।
अन्तःसाक्षाद्राजादीक्षागुरवो जयन्ति केऽपि जनाः ॥ १३ ॥
स्वच्छन्दं दलदरविन्द ! ते मरन्दं
विन्दन्तो विदधतु गुञ्जितं मिलिन्दाः।

---

(१) मर्म्म जानन्तीति ठक् मार्म्मिकाः मर्म्मज्ञाः। (२) मिलिन्दाः भ्रमराः।
(३) नीचः निम्नः अन्यापेक्षया हीनश्च गम्यते।
(४) सरसं सजलं हृदयमभ्यन्तरं यस्य सरसान्तःकरणश्च ध्वन्यते। गुणः कलसाकर्षणरज्जुः गृहीता लब्धा ज्ञाता च ध्वन्यते।
(५) तेन मधुकरेण कुटजे हेहा कथं हा ! खेदे तेने कृता।
(६) पाटीरः चन्दनः। परिपाटीं रीतिम् उरीकर्त्तुं स्वीकर्त्तुं कः पटीयान् भवेत् ? न कोपीत्यर्थः।

Digitized by Google

आमोदानथ हरिदन्तराणि (१) नेतुं
नैवान्यो जगति समीरणात् प्रवीणः ॥ १४ ॥
याते मय्यचिरान्निदाघमिहिरज्वालाग्रतैः शुष्कतां
गन्ता कं प्रति ? पान्थसन्ततिरसौ सन्तापमालाकुला ।
एवं यस्यं निरन्तराधिपटलै-(२)र्नित्यं वपुः क्षीयते
धन्यं जीवनमस्य मार्गसरसो धिग्वारिधीनां जनुः ॥ १५ ॥
आपेदिरेऽम्बरपथं परितः पतङ्गाः
भृङ्गा रसालमुकुलानि समाश्रयन्ते ।
सङ्कोचमञ्चति सरस्यि दीनदीने(३)
मीनो नु हन्त कतमां ? गतिमभ्युपैतु ॥ १६ ॥
मधुप इव मारुतेऽस्मिन् मा सौरभलोभमम्बुजिनि ! संस्थाः ।
लोकानामेव मुदे महितोऽप्यात्मामुनार्थितां नीतः ॥ १७ ॥
गुञ्जति मञ्जु मिलिन्दे मा मालति ! मौनमुपयासीः ।
शिरसा वदान्यगुरवः (४) सादरमेनं वहन्ति सुरतरवः ॥१८॥
यैस्त्वं गुणगणवानपि (५) सतां द्विजिह्वै-(६)रसेव्यतां नीतः ।
तानपि वहसि पटीरज !(७) किं ? कथयामस्त्वदीयमौन्नत्यम् १९

---

(१) हरिदन्तराणि दिगन्तराणि ।
(२) आधिः मानसी व्यथा । पटलानि समूहाः ।
(३) हे सरः ! दीनदीने दीनप्रकारे अत्यन्तदीने इत्यर्थः त्वयि सङ्कोचम् अञ्चति गच्छति सति ।
(४) वदान्याः बहुदातारस्तेषां गुरवः श्रेष्ठवदान्याः ।
(५) गुणगणवान् भूम्नि प्रशंसायां वा मतुप् ।
(६) द्विजिह्वाः सर्पाः । (७) पटीरज ! चन्दनतरो !

Digitized by Google

गाहितमखिलं गहनं परितो दृष्टाश्च विटपिनः सर्व्वे।
सहकार! न प्रपेदे मधुपेन भवत्समं जगति॥ २०॥
अपनीतपरिमलान्तरकथे पदं न्यस्य देवतरुकुसुमे।
पुष्पान्तरेऽपि गन्तुं वाञ्छसि चेद्भ्रमर! धन्योऽसि॥ २१॥
तटिनि! (१) चिराय विचारय विन्ध्यभुवस्तव पवित्रायाः।
शुष्यन्त्या अपि युक्तं किं? खलु रथ्योदकादानम्॥ २२॥
पत्रफलपुष्पलक्ष्मा कदाप्यदृष्टं वृतञ्च खलु शूकैः (२)।
उपसर्पेम भवन्तं वर्व्वुर!(३) वद कस्य लोभेन?॥ २३॥
एकस्त्वं गहनेऽस्मिन् कोकिल! न कलं कदाचिदपि कुर्य्याः।
साजात्यग्रहयामो न त्वां निघ्नन्ति निर्दयाः काकाः॥ २४॥
तरुकुलसुषमा-(४) पहरां जनयन्तीं जगति जीवजातार्त्तिम्।
केन गुणेन भवानीतात! हिमानीमिमां वहसि?॥ २५॥
कलभ! तवान्तिकमागतमलिमेनं मा कदाप्यवज्ञासीः।
अपि दानसुन्दराणां हिषधुर्य्याणामयं शिरोधार्य्यः॥ २६॥
अमरतरुकुसुमसौरभसेवनसम्पूर्णसकलकामस्य।
पुष्पान्तरसेवेयं भ्रमरस्य विडम्बना महती॥ २७॥

---

(१) हे तटिनि! वाक्यार्थः कर्म्म विचारय किमित्याह। पवित्रायास्तव, पवित्रत्वे हेतुः विन्ध्यभुवः विन्ध्यभवायाः शुष्यन्त्या अपि किं रथ्यायाः पथः उदकस्यादानं किं? युक्तमिति विचारयेत्यर्थात्।
(२) शूकैः शूच्याकाराग्रैः। (३) कर्व्वुरः (वावदा) वृक्षः।
(४) सुषमा परमा शोभा। जीवजातानां प्राणिसमूहानामार्त्तिं जनयन्तीं निष्पादयन्तीमिमां हिमानीं हिमसंकृतिं केन? गुणेन कर्म्मणा प्रयोजनायेत्यर्थः हे भवानीतात! भवानीगुरो! तव नैतदुचितमिति भावः।

Digitized by Google

पृष्टाः खलु परपुष्टाः परितो दृष्टाश्च विटपिनः सर्व्वे ।
माकन्द ! (१) न प्रपेदे मधुपेन तवोपमा जगति ॥ २८ ॥
तोयैरल्पैरपि करुणया भीमभानौ निदाघे
मालाकार ! व्यरचि भवता या तरोरस्य पुष्टिः ।
सा किं शक्या ? जनयितुमिह प्रावृषेण्येन (२) वारां
धारासारानपि विकिरता विश्वतो वारिदेन ॥ २९ ॥
आरामाधिपतिर्विवेकविकलो नूनं रसा नीरसा
वात्याभिः परुषीकृता दश दिशश्चण्डातपो दुस्सहः ।
एवं धन्वनि (३) चम्पकस्य सकले संहारहेतावपि
त्वं सिञ्चन्नमृतेन (४) तोयद ! कुतोऽप्याविष्कृतो(५) वेधसा ॥३०
न यत्र क्षेमाणं (६) दधुरतिभयभ्रान्तनयना:
गलद्दानोद्रेकभ्रमदलिकदम्बाः करटिनः ।
लुठन्मुक्ताभारे भवति परलोकं गतवतो
हरेरद्य द्वारे शिवशिव ! शिवानां कलकलः ॥ ३१ ॥
दधानः प्रेमाणं तरुषु समभावेन विपुलं
न मालाकारोऽसावकृत करुणां बालबकुले ।

---

(१) हे माकन्द ! सहकार !
(२) प्रावृषि भवः एन्यश् वर्षाप्रभवेत्यर्थः ।
(३) धन्वनि मरुदेशे ।
(४) अमृतेन जलेन ।
(५) कुतोऽपि कस्मादपि हेतुभूतादाविष्कृतः प्रकटितः ।
(६) क्षेमाणं स्थिरत्वम् हरेः सिंहस्य कलकलो भवतीत्यन्वयः शिवशिवेति ईश्वरस्मरणं खेदसूचनाय ।

Digitized by Google

अयन्तु द्रागुद्यत्कुसुमनिकराणां परिमलै:
दिगन्तानातेने मधुपकुलझङ्कारभरितान् (१) ॥ ३२ ॥
मूलं स्थूलमतीव बन्धनदृढं शाखा: शतं मांसला: (२)
वासो दुर्गमहीधरे तरुपते ! कुत्रास्ति भीतिस्तव ? ।
एकः किन्तु मनागयं जनयति स्वान्ते ममाधिज्वरं
ज्वालालीवलयीभवन्नकरुणो दावानलो घस्मर: (३) ॥ ३३ ॥
ग्रीष्मे भीष्मतरै: करैर्दिनकृता दग्धोऽपि यश्चातक:
त्वां ध्यायन् घन ! वासरान् कथमपि ? द्राघीयसो (४) नीतवान्
दैवाल्लोचनगोचरेण भवता तस्मिन्निदानीं यदि
स्वीचक्रे करकानिपातनकृपा (५) तत् कं प्रति ब्रूमहे ? ॥ ३४ ॥
दवदहनजटालज्वालजालाहतानाम् (६)
परिगलितलतानां स्वायतां भूरुहाणाम् !
अपि जलधर ! शैलश्रेणिशृङ्गेषु तोयं
वितरसि बहु कोऽयं ? श्रीमदस्तावकीन: ॥ ३५ ॥

---

(१) झङ्कारभरो झङ्कारातिशयो जातोऽस्य तारकादित्वादितच् अयं बालबकुलस्तु आतेने चकार ।
(२) मांसला: पुष्टा: ।
(३) घस्मर: भक्षकः नाशकः इत्यर्थः ।
(४) द्राघीयसः दीर्घतरान् अतिदहत इत्यर्थः ।
(५) करकाः घनीभूतजलमयशिलाखण्डास्तन्निपातनेन या कृपा विरोधिलक्षणया कृपाभावः ।
(६) दवदहनस्य दावानलस्य जटालाः जटावत् पिङ्गलाः ज्वालाः शिखास्तासां जालेन समूहेन आहतानाम् ।

Digitized by Google

शृण्वन् पुरः परुषगर्जितमस्य हन्त
रे पान्थ ! विक्लवमना न मनागपि स्याः ।
विश्वार्त्तिवारण-(१) समर्चितजीवितोऽयं
नाकर्णितः किमु ? सखे ! भवताम्बुवाहः ॥ ३६ ॥
सौरभ्यं भुवनत्रयेऽपि विदितं श्रैत्यं नु लोकोत्तरं
कीर्त्तिः किञ्च दिगङ्गनाङ्गणगता किन्त्वेतदेकं शृणु ।
सर्व्वानेव गुणानियं निगिरति(२) श्रीखण्ड ! (३) ते सुन्दरान्
उज्झन्ती खलु कोटरेषु गरलज्वालां द्विजिह्वावली ॥३७॥
नापेक्षा(४) न च दाक्षिण्यं न प्रीतिर्न च सङ्गतिः ।
तथापि हरते तापं लोकानामुन्नतो घनः ॥ ३८ ॥
समुत्पत्तिः स्वच्छे सरसि हरिहंसे निवसतिः(५)
विलासः पद्माया सुरहृदयहारी परिमलः ।
गुणैरेतैरन्यैरपि च ललितश्यामभुज ! तव
द्विजोत्तंसे(६) हंसे यदि रतिरतीवोन्नतिरियम् ॥ ३९ ॥

---

(१) विश्वार्त्तिवारणश्चासापनिवारकः, समर्चितं सन्तोषितं जीवितं येन पश्चात् कर्म्मधारयः ।
(२) निगिरति उद्गमति । (३) श्रीखण्ड ! चन्दन !
(४) नापेक्षा नोपकाराद्यपेक्षा, दाक्षिण्यमानुकूल्यं, प्रीतिः स्नेहः, सङ्गतिः सहवासः एतेषामेव प्रत्येकमुपकारप्रयोजकत्वात् घनस्य तेषामेकैकाभावेऽपि तापनिराकरणत्वम्, तत्र हेतुः औन्नत्यम् ।
(५) हरिहंसे सूर्य्यकरे निवसतिः प्रकाशः विलासः विलासभूमिः ।
(६) द्विजानां पक्षिणां ब्राह्मणानाञ्चेति ध्वनिः उत्तंसे भूषणभूते हंसे रतिः अनुरागः ।

Digitized by Google

साकं ग्रावगणै-(१) र्लुठन्ति मणयस्तीरेऽर्कबिम्बोपमाः
नीरे नीरचरैः समं स भगवान् निद्राति नारायणः ।
एवं वीक्ष्य तवाविवेकमपि च प्रौढिं परामुन्नतेः
किं ? निन्द्यान्यथवा स्तवानि कथय क्षीरार्णव ! त्वामहम् ॥४०॥
किं खलु रत्नैरेतैः ? किं पुनरब्भ्राम्यितेन(२) वपुषा ते ? ।
सलिलमपि यन्न तावकमर्णव ! वदनं प्रयाति हृषितानाम् ॥४१॥
दूयत्यां सम्यक्त्वापि च सलिलानां त्वमधुना
न हृष्णामार्त्तानां हरसि यदि कासार ! (३) सहसा ।
निदाघे षण्डांशौ किरति परितोऽङ्गारनिकरं
क्षयीभूतः केषामहह परिहर्त्तासि खलु ताम् (४) ॥ ४२ ॥
अयि रोषमुरीकरोषि नो चेत्
किमपि ? त्वां प्रति वारिधे ! वदामः ।
जलदेन तवार्थिना विमुक्ता-
न्यपि तोयानि मनाङ् (५) न हा जहासि ॥ ४३ ॥
न वारयामो भवतीं विभ्रन्तीं वर्षानदि ! स्रोतसि जङ्घजाया: ।
न युक्तमेतत्तु पुरो यदस्यास्तरङ्गभङ्गान् प्रकटीकरोषि ॥ ४४ ॥

---

(१) ग्रावगणैः शिलासमूहपुञ्जैः साकं सह अर्कबिम्बोपमा अतिदीप्तयो मणयो लुठन्ति ।
(२) अब्भ्राम्यितेन अब्भ्रः सजलमेघ इवाचरितेन तत्सदृशेन नीलेनेत्यर्थः ।
(३) हे कासार ! हे सरोवर ! (४) तां हृष्णाम् ।
(५) जलदैरप्यर्थमानत्वेन श्रेष्ठोऽपि त्वं तवार्थिना जलदेन सम्प्राप्यापि जलानि त्वं मनागल्पं न जहासि किन्तु संपत्सम्प्राप्तासीति हा खेदायैवैतदित्यर्थः ।

Digitized by Google

पौलोमीपतिकानने (१) विलसतां गीर्वाणभूमिरुहाम्
येन घ्रातसमुज्झितानि कुसुमान्याजघ्रिरे निर्जरैः ।
तस्मिन्नद्य मधुव्रते विधिवशान्माध्वीकमाकाङ्क्षति (२)
त्वञ्चेदम्बुजसि लोभमम्बुज ! तदा किं त्वां प्रति ब्रूमहे ! ॥ ४५ ॥

भुक्ता मृणालपटली भवता निपीता-
न्यम्बूनि यत्र नलिनानि निषेवितानि ।
रे राजहंस ! वद तस्य सरोवरस्य
कृत्येन केन भवितासि कृतोपकारः ? ॥ ४६ ॥

प्रारम्भे कुसुमाकरस्य (४) परितो यस्योल्लसन्मञ्जरी-
पुञ्जे मञ्जुलगुञ्जितानि रचयंस्तानातनोरुत्सवान् ।
तस्मिन्नद्य रसालशाखिनि दशां दैवात् कृशामश्नति
त्वञ्चेन्मुञ्चसि चञ्चरीक ! विनयं नीचस्त्वदन्योऽस्ति कः ॥ ४७ ॥

एणीगणेषु गुरुवर्गनिमीलिताक्षः
किं कृष्णसार ! खलु खेलसि काननेऽस्मिन् ! ।
सीमामिमां कलय भिन्नकरीन्द्रकुम्भ-
मुक्तामयीं हरिविहारवसुन्धरायाः ॥ ४८ ॥

---

(१) पौलोमी शची तत्पतिकानने नन्दनवने ।

(२) तस्मिन् मधुव्रते भ्रमरे अद्य विधिवशात् दौर्भाग्येन तव माध्वीकं मधु आकाङ्क्षति सति हे अम्बुज ! पद्म ! त्वं चेत् लोभं क्षोभं सङ्कोचं दान-प्रातिकूल्यञ्च गच्छसि ।

(३) कुसुमाकरस्य वसन्तस्य । तान् अनुभूतान् चञ्चरीक ! भ्रमर ! विनयं कृत-ज्ञतां मुञ्चसि त्यजसि ।

Digitized by Google

जठरज्वलनज्वलता-(१) व्यपगतशङ्कं समागतापि पुरः।
करिणामरिणा हरिणा हरिणाली हन्यतां नु कथम् ?॥ ४९॥
येन भिन्नकरिकुम्भविस्खलन्-
मौक्तिकावलिभिरञ्चिता मही।
अद्य तेन हरिणान्तिके कथं
कथ्यतां नु हरिणा (२) पराक्रमः ?॥ ५०॥
स्थितिं नो रे दध्याः क्षणमपि मदान्धेक्षण! सखे!
गजश्रेणीनाथ त्वमिह जटिलायां वनभुवि।
असौ कुम्भिभ्रान्त्या, (३) खरनखरविद्रावितमहा-
गुरुग्रावग्रामः स्वपिति गिरिगर्भे हरिपतिः॥ ५१॥
गिरिगह्वरेषु गुरुगर्वगुम्फितो
गजराजपोत! न कदापि मञ्जरेः।
यदि बुध्यते हरिशिशुः स्तनन्धयो
भविता करेणुपरिषेविता मही॥ ५२॥
निसर्गादारामे तरुकुलसमारोपसुकृती
कृती मालाकारो बकुलमपि कुर्वापि निदधे।

---

(१) जठरज्वलनेन उदराग्निना ज्वलता तप्यमानेन क्षुधार्त्तेनापीत्यर्थः।
(२) तेन हरिणा हरेः पराक्रमः कथं कथ्यतां वर्ण्यताम्। हरिणेति हतीया निरङ्कुशत्वात् कवेः समर्थनीया हतुयोगे षष्ठ्या एवानुशासनात्।
(३) कुम्भी हस्ती तदीयकुम्भभ्रमेणैव महागुरुशिलाखण्डपुञ्जविदारणं सिंह-स्वेन सेयम्।

Digitized by Google

इदं को जानीते ? यदयमिह कोणान्तरगतो
जगज्जालं (१) कर्त्ता कुसुमभरसौरभ्यभरितम् ॥ ५३ ॥
यस्मिन् वेल्लति (२) सर्व्वतः परिचलत्कल्लोलकोलाहलै-
र्मन्याद्रिभ्रमणभ्रमं हृदि हरिद्दन्तावलाः पेदिरे ।
सोऽयं तुङ्गतिमिङ्गिलाङ्गवलीकारक्रियाकोविदः
क्रीड़े क्रीड़तु कस्य ? कलिकलहत्यक्तार्णवो राघवः ॥ ५४ ॥
लूनं मत्तमतङ्गजैः कियदपि क्लिन्नं तुषारार्दितैः
श्लिष्टं ग्रीष्मजभीष्मभानुकिरणैर्भस्मीकृतं काननम् ।
एषा कोणगता मुहुः परिमलैरामोदयन्ती दिशः
हा कष्टं ललिता लवङ्गलतिका दावाग्निना दह्यते ॥ ५५ ॥
स्वर्लोकस्य शिखामणिः, सुरतरुग्रामस्य धामाद्भुतं
पौलोमीपरिणेतयोः परिणतिः पुण्यावलीनामसि ।
सत्यं नन्दन ! किन्त्विदं सहृदयैर्नित्यं विधिः प्रार्थ्यते
त्वत्तः खाण्डवरङ्गताण्डवनटो (३) दूरेऽस्तु वैश्वानरः ॥ ५६ ॥
स्वस्थ्यापूर्तिमयूमानसतया मत्तो निवृत्ते जने
चञ्चूकोटिविपाटितारर्पुटो यास्याम्यहं पञ्जरात् ।

---

(१) जगज्जालं जगत्समुदायं समस्तभूभागमित्यर्थः कर्त्ता करिष्यति क्रुट् । भरितमिति कृतच्प्रत्ययः ।

(२) वेल्लति चलति सति हरिद्दन्तावलाः दिग्गजाः । तिमिङ्गिलः मत्स्यभेदः । राघवः (वीयालि) प्रसिद्धो हरिद्दन्तमत्स्यभेदः ।

(३) खाण्डवो वनभेदः रङ्ग इव तत्र ताण्डवे नर्त्तने ज्वालया सप्तद्वीपने नट इव ।

Digitized by Google

एवं कीरवरे (१) मनोरथमयं पीयूषमास्वादय-
त्यन्तः सम्प्रविवेश वारणकराकारः फणिग्रामणीः ॥ ५७ ॥
रे चाञ्चल्यजुषो ! मृगाः ! श्रितनगाः ! कल्लोलमालाकुला-
मेतामम्बुधिगामिनीं व्यवसिताः सङ्गाहितुं वा कथम् ।
अत्रैवोच्छलदम्बुनिर्भरमहावर्त्तैः समावर्त्तितो
यद् गावेव रसातलं पुनरसौ यातो गजग्रामणीः ॥ ५८ ॥
पिब स्तन्यं पोत ! त्वमिह मददन्तावलधिया
दृगन्तानाधत्से किमिति हरिदन्तेषु परुषान् ? ।
त्रयाणां लोकानामपि हृदयतापं परिहरन्
अयं धीरं धीरं ध्वनति नवनीलो जलधरः ॥ ५९ ॥
धीरध्वनिभिरलं ते नीरद ! मे मासिको गर्भः ।
उन्मदवारणबुद्ध्या मध्येजठरं (२) समुच्छलति ॥ ६० ॥
वैतुण्डगण्डकण्डूतिपाण्डित्यपरिपन्थिना (३) ।
हरिणा हरिणालीषु कथ्यतां कः पराक्रमः ? ॥ ६१ ॥
नीरान्निर्मलतो जनि, र्मधुरता वामामुखस्पर्द्धिनी
वासो यस्य हरेः करे, परिमलो गीर्वाणचेतोहरः ।

---

(१) जले भवः मत्स्यकायात् निष्टप्ते सति । अरारं कपाटं प्रस्तरस्यहारमित्यर्थः तत्पुटमिव संहतत्वात् । कीरवरे शुक्तश्रेष्ठे ।

(२) जठरस्य मध्ये मध्येजठरमित्यव्ययीभावः । मासिको मासजातो गर्भः वस्तु-च्छलति पतनाय चलति ।

(३) विधिर्दं लुण्डमाननमस्य प्रज्ञादित्वादण् वैतुण्डः गजस्तस्य गण्डयोः कण्डूतौ घर्षणे यत् पाण्डित्यं नैपुण्यं तस्य परिपन्थिना विरोधिना ।

Digitized by Google

सर्व्वस्वं तदहो महाकविगिरां कामस्य चाम्भोरुह !
त्वञ्चेत् प्रीतिसुरीकरोषि मधुपे तत्त्वाम् किमाचक्ष्महे ॥ ६२ ॥
लीलामुकुलितनयनं किं सुखशयनं समातनुषे ? ।
परिणामविषमहरिणा करिमायक ! वर्द्धते वैरम् ॥ ६३ ॥
विदुषां वदनाद्वाचः सहसा यान्ति नो वहिः ।
यातास्त्रेन्न पराङ्मुखन्ति (१) दिरदानां रदा इव ॥ ६४ ॥
औदार्य्यं भुवनत्रयेऽपि विदितं सम्भूतिरम्भोनिधे-
र्वासो नन्दनकानने परिमलो गीर्व्वाणचेतोहरः ।
एवं दाढगुरोर्गुणाः सुरतरोः सर्व्वेऽपि लोकोत्तराः
स्यादर्थिप्रवरार्थितार्पणविधा (२) वेको विवेको यदि ॥ ६५ ॥
एको विश्वसतां हरामयपघृणः (३) प्राणानहं प्राणिनाम्
इत्येवं परिचिन्त्य मा खमनसि व्याधानुतापं कृथाः ।
भूपानां भवनेषु किञ्च विमलच्चेचेषु गूढ़ाशयाः (४)
साधूनामरयो वसन्ति कति नो त्वत्तुल्यकक्षाः खलाः ?॥ ६६ ॥
विश्वास्य मधुरवचनैः साधून् ये वञ्चयन्ति नक्षतमाः ।

---

(१) पराङ्मुखन्ति परावर्त्तन्ते ।
(२) अर्थिषु याचकेषु प्रवरैः श्रेष्ठैः अर्थितस्य याचितस्य अर्पणविधौ याचन-कर्म्मणि यदि एकः विवेकः स्यात् ।
(३) अपघृणः निर्दयः विश्वसतां नृणां प्राणान् एकोऽहमेव हरामीति विचिन्त्य हे व्याध ! अनुतापमनुशयं मा कृथाः ।
(४) गूढ़ाशयाः गुप्ताभिप्रायाः त्वत्तुल्यकक्षाः तव तुल्यपक्षाः खलाः कति ? नो वसन्ति ।

Digitized by Google

तानपि दधासि मातः ! काश्यपि(१) यातस्त्वयापि च विवेकः ॥६७

अन्या जगद्धितमयी मनसः प्रवृत्ति-
रन्यैव कापि रचना वचनावलीनाम् ? ।
लोकोत्तरा च कृतिराकृतिरार्द्रहृद्या
विद्यावतां सकलमेव गिरां दवीयः (२) ॥ ६८ ॥

आपद्गतः किल महाशयचक्रवर्त्ती
विस्तारयत्यकृतपूर्व्वमुदारभावम् ।
कालागुरुर्दहनमध्यगतः समन्तात्
लोकोत्तरं परिमलं प्रकटीकरोति ॥ ६९ ॥

विश्वाभिरामगणगौरवगुम्फितानां
रोषोऽपि निर्म्मलधियां रमणीय एव ।
लोकम्पृणैः (३) परिमलैः परिपूरितस्य
काश्मीरजस्य कटुतापि नितान्तरम्या ॥ ७० ॥

लीलालुण्ठितशारदापुरमहासभ्यङ्कराणाम् पुरो
विद्यासद्मविनिर्गलत्कणमुषो (४) वल्गन्ति चेत् पामराः ।

---

(१) हे मातः ! काशि ! वाराणसि ! तानपि दधासि धारयसि अयत्नत्वापि विवेकः यातः अपकृतः ।

(२) विद्यावतां सकलमेव वस्तु गिरां वाग्व्यापाराणां दवीयः दूरतरं वचनाविषय इत्यर्थः ।

(३) लोकं पृणन्ति तर्पयन्तीति तथा लोकतर्पकैः ।

(४) विद्याग्रहात् च्युतकणमात्रापहारकाः । पामराः मूर्खाः ।

Digitized by Google

अद्यश्वाः फणिनां शकुन्तशिशवो दन्तावलानां दृकाः
सिंहानाञ्च सुखेन मूर्द्धसु पदं धास्यन्ति शालादृकाः (१) ॥७१॥
गीर्भिर्गुरूणां परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसन्ति ॥ ७२ ॥
वहति विषधरान् पटीरजन्मा (२)
शिरसि मषीपटलं दधाति दीपः ।
विधुरपि भजतेतरां कलङ्कम्
पिशुनजनं खलु बिभ्रति क्षितीन्द्राः ॥ ७३ ॥
सत्पूरुषः खलु हिताचरणैरमन्द-
मानन्दयत्यखिललोकमनुक्त एव ।
आराधितः कथय केन (३) करैरुदारै ?-
रिन्दुर्विकाशयति कैरविणीकुलानि ॥ ७४ ॥
क्षतमपि महोपकारं पय इव पीत्वा (४) निरातङ्कम् ।

---

(१) अद्य वर्त्तमानदिने श्वयत्ने वर्द्धन्ते श्वेर्डः सद्योजाताः शकुन्तशिशवः पक्षिशावकाः फणिनां मूर्द्धसु, दृकाः शुकव्याघ्राः द्विपानां मूर्द्धसु, शालादृकाः व्याघ्रभेदाः सिंहानां मूर्द्धसु च पदं सुखेन धास्यन्ति आरोपयिष्यन्ति तथाच तथाचरन्ति यथा सर्व्वथानुचितं स्वमरणप्रदत्वादेवं मूर्खाणां विद्वत्समीपे वसनमिति भावः ।

(२) पटीरजन्मा चन्दनः ।

(३) केनाराधितः ? करैरिन्दुः कैरविणी कुमुदिनी तत्कुलानि विकाशयति तत् कथय ।

(४) पयोदुग्धं तच्च शिशुभक्षणार्थं स्थापितं कृष्णसर्पेण पीत्वा शिशुः पश्चात् दष्ट इति प्रसिद्धकथानानुसन्धेया ।

Digitized by Google

प्रत्युत हन्तुं यतते काकोदरसोदरः (१) खलो जगति ॥७५॥
पाण्डित्यं परिहृत्य यस्य हि कृते वन्दित्वमालम्बितं
दुष्प्रापं मनसापि यो गुरुतरैः क्लेशैः पदं प्रापितः।
रूढ़-(२) स्तब्ध स चेन्निगीर्य्य सकलां पूर्व्वोपकारावलीं
दृष्टः प्रत्यवतिष्ठते तदधुना कस्मै किमाचक्ष्महे ? ॥ ७६ ॥
परार्थ्यासङ्गादुपजहदपि स्वार्थपरता-
मभेदैकत्वं (३) यो वहति गुरु भूतेषु सततम्।
स्वभावाद्यस्यान्तः स्फुरति ललितोदात्तमहिमा
समर्थो यो नित्यं स जयतितरां कोऽपि पुरुषः ॥७७॥
वंशभवो(४) गुणवानपि सङ्गविशेषेण पूज्यते पुरुषः।
न हि तुम्बीफलविकलो वीणादण्डः प्रयाति महिमानम् ॥७८॥
अमितगुणोऽपि पदार्थो दोषेणैकेन निन्दितो भवति।
निखिलरसायनमहितो (५) गन्धेनोग्रेण लशुन इव ॥ ७९ ॥

(१) काकोदरः सर्पः तत्सोदरः तत्सदृशः तथाच खलेनोपकारो न लभ्यते इति भावः।
(२) रूढ़ः प्राग्पदतया बद्धमूल इत्यर्थः। निगीर्य्य विनाश्य विच्छेत्येत्यर्थः।
(३) यः पुरुषः सज्जनः परमात्मा च स्वार्थपरतां स्वार्थसिद्धिग्रहेयम् उपजहत् त्यजन्नपि परार्थ्यासङ्गात् परार्थनिष्पादनासक्तेः भूतेषु प्राणिषु सतत गुरु अधिकं नित्यकालिकत्वेन अत्यन्तम् अभेदैकत्वम् अभिन्नत्वम् अभेदे सति एकत्वमद्वितीयत्वञ्च सर्व्वं खल्विदं ब्रह्मेति श्रुतेः सर्व्वेषां ब्रह्माभिन्नत्वमिति तथोक्तम्। यस्य पुरुषस्य ललितोदात्तमहिमा अतिमनोहरोत्कृष्टमाहात्म्यम् स्वभावादेव अन्तः सर्व्वेषां प्राणिनामन्तः स्फुरति समर्थः प्रभुः संप्रार्थ्यमानश्च कोऽपि अनिर्वचनीयः स पुरुषो नित्यं जयतितरां सर्व्वोत्कर्षेण वर्त्तते।
(४) वंशः वेणुः कुलञ्च गुणो रज्जुः विनयादिधर्म्मश्च।
(५) लशुनः रसायने पारदशोधने महितः वैद्यैः पूजितोऽपि उग्रेण उत्कटेन गन्धेन निन्दितः।

Digitized by Google

उपकारमेव तनुते विपद्गतः सद्गुणो नितराम् ।
मूर्च्छां (१) गतो मृतो वा निदर्शनं पारदोऽत्र रसः ॥ ८० ॥
वनान्ते खेलन्ती प्रलयकलिमुद्भालोक्य चकिता
भुजप्रान्तं भर्त्तुर्भजति भयहर्त्तुः सपदि या ।
अहो सेयं सीता दशवदननीता हलरदैः (२)
परिता रक्षोभिः श्रयति विषण्णा कामपि दशाम्? ॥ ८१ ॥
पुरो गीर्वाणानां निजभुजबलाहोपुरुषिकाम्
अहो (३) कारं कारं पुरभिदि शरं सम्मुखयतः ।
स्मरस्य खर्वीलानयनशुभमालार्चनपदं
वपुः सद्यो भालानलभसितजालास्पदमभूत् ॥ ८२ ॥
शुक्लं सभायां खलु मर्कटानां
शाखासरूपां मृदुलासनानि (४) ।

---

(१) मूर्च्छां वैद्योक्तसंस्कारविशेषं मृतः चन्द्रोदयादिभूयः पारदाख्यो रसः धातुः अत्र निदर्शनं दृष्टान्तः ।
(२) हलवत्खदन्तैः रक्षोभिः परीता व्याप्ता ।
(३) निजभुजबलस्य आहोपुरुषिकाम् "अहमेव समर्थः नान्यः" इत्याकारकदर्पहेतुकाहङ्कारविशेषम् । गीर्वाणानां देवानां पुरः अग्रे कारंकारं अभीक्ष्णं कृत्वा आभीक्ष्ण्ये णमुल् । शरं सम्मुखयतः सम्मुखं कुर्वतः आभिमुख्येन व्रजत इत्यर्थः । खर्वीलानां खर्गस्त्रीणां नयनशुभमालया अर्चनपदं पूजायोग्यं वपुः सद्यस्तत्क्षणात् भालस्थस्य अनलस्य वह्नेः भसितायाः उद्दीपितायाः ज्वालायाः आस्पदं विषयः अभूत् ।
(४) तद्रूपां शाखा एव सभायां सभायोग्यानि मृदुलासनानि कोमलासनानि ।

Digitized by Google

सुभाषितं चीत्कृतिरातिथेयी (१)
दन्तैर्नखाग्रैश्च विपाटितानि ॥ ८३ ॥
किं तीर्थं ? हरिपादपद्मभजनं, किं ? रत्नमच्छा मतिः,
किं शास्त्रं ? श्रवणेन यस्य गलति द्वैतान्धकारोदयः(२)।
किं मित्रं सततोपकाररसिकं ? तत्त्वावबोधः सखे !
कः शत्रुर्वद खेददानकुशलो, दुर्व्यासनासञ्चयः (३) ॥ ८४ ॥
निष्णातोऽपि च वेदान्ते साधुत्वं नैति दुर्जनः।
चिरं जलनिधौ मग्नो मैनाक इव माईवम् (४) ॥ ८५ ॥
नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम्।
शाखिनोऽन्ये विराजन्ते खण्ड्यन्ते चन्दनद्रुमाः ॥ ८६ ॥
परोपसर्पणानन्तचिन्तानलशिखाशतैः।
अचुम्बितान्तःकरणाः साधु जीवन्ति पादपाः ॥ ८७ ॥
शून्येऽपि च गुणवत्तामातन्वानः स्वकीयगुणजालैः (५)।
विवराणि मुद्रयन् द्रागूर्णायुरिव सुजनो जयति ॥ ८८ ॥

---

(१) अतिथये साध्वी ढक् आतिथेयी। विपाटितानि परस्परं विदलितानि एतानि येषां चेष्टास्तेषां किमु वक्तव्यम् ? इति भावः।

(२) द्विधा इतं द्वीतं तस्य भावः द्वैतं भेदः तदन्धकार इव तस्योदयः प्रादुर्भावः यस्य शास्त्रस्य वेदान्तस्येत्यर्थः श्रवणेन गलति अपसरति।

(३) दुष्टाः कलत्रादिविषया वासनास्तासां सञ्चय एव शत्रुरिति निष्कर्षः।

(४) वेदान्ते वेदमर्यादायां तदुक्तास्थितौ निष्णातोऽपि कुशलोऽपि दुर्जनः साधुत्वं नैति। माईवं मृदुता आर्द्रतामिति भावः।

(५) शून्ये अनवकाशे शून्यहृदये जने च गुणवत्तां तन्तुमत्तां विनयादिगुणशालित्वञ्च। स्वकीयगुणजालैः निजतन्तुमयजालाकारपदार्थैः निजविनयादिधर्मसमूहैश्च विवराणि छिद्राणि शून्यभागांश्च। ऊर्णायुः (माकड़सा) जन्तुभेद इव मुद्रयन् आच्छादयन् गोपयंश्च।

Digitized by Google

खलः सज्जनकार्पासरचणैकहुताशनः ।
परदुःखाग्निशमने मारुतः केन वर्ण्यताम् ? (१) ॥ ८९ ॥
परगुह्यगुप्तिनिपुणं गुणमयमखिलैः समीहितं नितराम् ।
ललिताम्बरमिव सज्जनमाखव इव दूषयन्ति खलाः (२) ॥ ९० ॥
कारुण्यकुसुमाकाशः शान्तिशैत्यहुताशनः (३) ।
यशःसौरभ्यलशुनः खलः सज्जनदुःखदः ॥ ९१ ॥
धत्ते भरं कुसुमपत्रफलावलीनां
मर्म्मव्यथां स्पृशति शीतभवां रुजञ्च ।
यो देहमर्पयति चान्यसुखस्य हेतो-
स्तस्मै वदान्यगुरवे तरवे नमोऽस्तु ॥ ९२ ॥
हालाहलं खलु पिपासति कौतुकेन
कालानलं परिचुचुम्बिषति प्रकामम् ।
व्यालाधिपञ्च यतते परिरब्धुमद्धा (३)
यो दुर्ज्जनं वशयितुं कुरुते मनीषाम् ॥ ९३ ॥

---

(१) परदुःखाग्निशमने मारुत इव तच्छमनविरोधी पवन इव खलः केन कथं ? वर्ण्यतां न कथमपीत्यर्थः ।

(२) परगुह्यगुप्तिनिपुणं परगुह्यदोषाच्छादनचतुरं परगुह्यदोषगोपनचतुरं च गुणमयं तन्तुमयं विनयादिगुणमयञ्च । आखवः मूषिकाः ।

(३) कारुण्यकुसुमस्य दयाकुसुमस्य आकाश इव आश्रयः, शान्तिशैत्यस्य हुताशन इव आधारः, यशःसौरभ्यस्य कीर्त्तिरूपसुगन्धस्य लशुन इव आधारः सर्व्वत्र विरोधिलक्षणा ।

(४) अद्धा हठात् मणिमन्त्रादिकौशलमन्तरेणेत्यर्थात् ।

Digitized by Google

दीनानि प्रति परिहाय शुष्कगस्था-
न्यौदार्यं प्रकटयतो महीधरेषु।
औन्नत्यं परममवाप्य दुर्मदस्य (१)
ज्ञातोऽयं जलधर! ते यथा विवेकः॥ ९४॥
गिरयो गुरवस्तेभ्योऽप्युर्वी गुर्वी ततोऽपि जगदण्डं।
तस्मादप्यतिगुरवः प्रलयेऽप्यचला महात्मानः॥ ९५॥
व्योम्नि स वासं कुरुते चित्रं निर्म्माति सुन्दरं पवने।
रचयति रेखाः सलिले चरति खले यस्तु सत्कारम्॥ ९६॥
हारं वक्षसि केनापि दत्तमज्ञेन मर्कटः?।
लेढ्रि जिघ्रति संचिप्य करोत्युन्नतमाननम्॥ ९७॥
मलिनेऽपि (२) रागपूर्णां विकसितवदनामनल्पजल्पेऽपि।
त्वयि चपलेऽपि च सरसां भ्रमर! कथं वा सरोजिनीं त्यजसि?॥९८
स्वार्थं धनानि धनिकात् प्रतिगृह्णतो य-
दास्यं भजेन्मलिनतां किमिदं विचित्रम्।
गृह्णन् परार्थमपि वारिनिधेः पयोऽपि
मेघोऽयमेति सकलोऽपि च कालिमानम् (३)॥ ९९॥
जनकः सानुविशेषो जातिः काष्ठं भुजङ्गमैः सङ्गः।

---

(१) दीनानि क्षुद्राणि शुष्कगस्थानि प्रति औदार्यं परिहाय त्यक्त्वा परम-मत्युत्कृष्टमौन्नत्यमवाप्य स्थितस्य दुर्मदस्य दुष्टचेष्टस्य दुष्टहङ्कारस्य च हे जलधर! ते तव यथा विवेकः सोऽयं ज्ञातः।

(२) मलिने कृष्णे मनोमालिन्यवति च। रागोऽनुरागः आरुण्यञ्च। चपले अस्थिरे च। सरसां रसयुक्तां सार्द्राञ्च।

(३) कालिमानं कालत्वम्।

Digitized by Google

खगुणैरेव पटोरज ! यातोऽसि तथापि महिमानम् ॥ १०० ॥
कस्मै हन्त फलाय सज्जन ! गुणग्रामार्ज्जने सज्जसि ?
स्वात्मोपस्करणाय चेन्मम वचः पथ्यं समाकर्णय ।
ये भावा हृदयं हरन्ति नितरां शोभाभरैः सम्भृताः
तैरेवास्य कलेः कलेवरपुषो दैनन्दिनं वर्द्धनम् (१) ॥ १०१ ॥
धूमायिता दश दिशो दलितारविन्दा
देहं दहन्ति दहना इव गन्धवाहाः ।
त्वामन्तरेण मृदुताम्रदलाम्रमञ्जु-
गुञ्जन्मधुव्रत ! मधो ! किल कोकिलस्य (२) ॥ १०२ ॥
भिन्ना महागिरिशिलाः करजाग्रजाग्र-
दुद्दामशौर्य्यनिकरैः करटिभ्रमेण (३) ।
दैवे पराचि करिणामरिणा तथापि
कुत्रापि नापि (४) खलु हा पिशितस्य लेशः ? ॥ १०३ ॥
गर्जितमाकर्ण्य मनागङ्के मातुर्निशार्द्धजातोऽपि (५) ।
हरिशिशुरुत्पतितुं द्रागङ्गान्याकुञ्च्य लीयते निभृतम् ॥ १०४ ॥

---

(१) स्वात्मन उपस्करणं शोभनं सतो गुणान्तराधानं तस्मै । तैरेव भावैः कलेवरपुषः पुष्टस्य कलेः कलहस्य दैनन्दिनं प्रतिदिनं वर्द्धनं शोभनम् ।
(२) हे मधो ! वसन्त ! त्वामन्तरेण त्वां विना कोकिलस्य दश दिशो धूमायिताः सन्तापकारिकाः ।
(३) करटिनः हस्तिनः ।
(४) पिशितस्य मांसस्य लेशः न आपि न प्राप्तः ।
(५) मनाक् अल्पमपि गर्ज्जितं मेघस्येति शेषः आकर्ण्य श्रुत्वा हस्तिरव-भ्रान्त्या सिंहशिशुः उत्पतितुमूर्द्धमाक्रमितुं द्राक् शीघ्रम् अङ्गानि आकुञ्च्य निभृतं मातुरङ्के लीयते ।

Digitized by Google

किमहं वदामि खल ! दिव्यतमम् ?
गुणपक्षपातमभितो भवतः ।
गुणशालिनो निखिलसाधुजनान्
यदहर्निशं न खलु विस्मरसि ॥ १०५ ॥
रे खल ! तव खलु चरितं विदुषां मध्ये विविच्य वक्ष्यामि ।
अथवालं पापात्मन् ! कृतया कथयापि ते हतया (१) ॥ १०६ ॥
आनन्दमृगदावाग्निः शीलशाखिमदद्विपः ।
ज्ञानदीपमहावायुरयं खलसमागमः ॥ १०७ ॥
खलास्तु कुशलाः साधुहितप्रत्यूहकर्म्मणि (२) ।
निपुणाः फणिनः प्राणानपहर्त्तुं निरागसाम् ॥ १०८ ॥
वदने विनिवेशिता भुजङ्गी
पिशुनानां रसनाभिधेन धात्रा ।
अनया कथमन्यथावलीढा ?
नहि जीवन्ति जना मनागमन्त्राः (३) ॥ १०९ ॥
कृतं महोन्नतं कृत्यमर्ज्जितश्चामलं यशः ।
यावज्जीवं सखे ! तुभ्यं दास्यामो विपुलाशिषः ॥ ११० ॥
अविरतं परकार्य्यकृतां सतां
मधुरिमातिशयेन वचोऽमृतम् ।

---

(१) हतया दग्धया अतिदुष्टत्वात् तथात्वम् ।
(२) प्रत्यूहकर्म्मणि प्रतिरोधक्रियायाम् ।
(३) रसनाभिधेन जिह्वाच्छलेन । अमन्त्रा गारुडमन्त्रविवर्जिता नीत्यनुसारिमन्त्ररहिताश्च ।

Digitized by Google

अपि च मानसमम्बुनिधिर्यशो
विमलशारदपार्वणचन्द्रिका (१) ॥ १११ ॥
निर्गुणः शोभते नैव विपुलाऽम्बरोऽपि ना (२) ।
आपातरम्यपुष्पश्रीशोभिता शाल्मलिर्यथा ॥ ११२ ॥
पङ्कैर्विना सरो भाति सदः खलजनैर्विना ।
कटुवर्णैर्विना काव्यं मानसं विषयैर्विना ॥ ११३ ॥
तत्त्वं किमपि काव्यानां जानाति विरलो भुवि ।
मार्मिकः को मरन्दानामन्तरेण मधुव्रतम् ॥ ११४ ॥
सरजस्कां पाण्डुवर्णां कण्टकप्रकराञ्चिताम् ।
केतकीं सेवसे हन्त कथं रोलम्ब ? निह्नुप ? ॥ ११५ ॥
यथा तानं (३) विना रागो यथा मानं विना नृपः ।
यथा दानं विना हस्ती तथा ज्ञानं विना यतिः ॥ ११६ ॥
सन्तः स्वतः प्रकाशन्ते गुणा न परतो नृणाम् ।
आमोदो न हि कस्तूर्याः शपथेन विभाव्यते (४) ॥ ११७ ॥
अपि वत गुरुगर्वं मा स्म कस्तूरि ? यासी-
रखिलपरिमलानां मौलिना सौरभेण ।

---

(१) सतां वाक्यं माधुर्यातिशयेन अमृतम्, मानसमपि अम्बुनिधिः गाम्भीर्येणेति शेषः । यशश्च शारदपौर्णमासीचन्द्रिका विमलत्वात् ।

(२) ना पुमान् ।

(३) तानस्य स्वरधारणार्थं वीणादिभिः साध्यः स्वरविशेषस्तानः । माधवादिव्यञ्जकस्वरभेदो रागः ।

(४) शपथेन परोपदेशेन न विभाव्यते नानुभूयते किन्तु साक्षात् घ्राणेन्द्रियेणैव गृह्यते इति ।

Digitized by Google

गिरिगहनगुहायां लीनमत्यन्तदीनं
खजनकममुनैव (१) प्राणहीनं करोषि ॥ ११८ ॥
दूरीकरोति कुमतिं विमलीकरोति
चेतश्चिरन्तनमघघ्वलुकीकरोति (२)।
भूतेषु किञ्च करुणां बहुलीकरोति
सङ्गः सतां किमु न मङ्गलमातनोति ॥ ११९ ॥

अनवरतपरोपकारव्यग्रीभवद्मलचेतसां महताम्।
आपातकटूनि (३) स्फुरन्ति वचनानि भेषजानीव ॥ १२० ॥

व्याकुञ्जन्मधुकरपुञ्जमञ्जुगीता-
न्याकर्ण्य श्रुतिमद-(४) ज्ञानयातिरेकात्।
आभूमीतलनतकन्धराणि मन्ये-
ऽरण्येऽस्मिन्नवनिरुहां कुटुम्बकानि ॥ १२१ ॥
मृतस्य (५) लिप्सा क्षपणस्य दित्सा
विमार्गगायाश्च ऋषिः स्वकान्ते।
सर्पस्य शान्तिः कुटिलस्य मैत्री
विधातसृष्टौ न हि दृष्टपूर्वा ॥ १२२ ॥

---

(१) अमुनैव लोकोत्तरसौरभेण स्वजनकं स्वप्रकृतिं मृगमित्यर्थः।
(२) चुलुकीकरोति पिबति नाशयतीति यावत्।
(३) कटोर्भावः काटवम् आपातेन सम्यगविचारेण काटवं येषाम् आपातेलुब्धा परिणामेऽकटूनीत्यर्थः।
(४) श्रुतौ श्रवणे यो मदः हर्षविशेषस्तज्ज्ञानात् तयातिरेकात् द्रवीभावातिशयात्। अवनिरुहां वृक्षाणां कुटुम्बकानि कुलानि आभूमीतलनतस्कन्धानि जातानीति मन्ये।
(५) मृतस्येति कर्मणि षष्ठी।

Digitized by Google

उत्तमानामपि स्त्रीणां विश्वासो नैव विद्यते ।
राजप्रियाः कैरविणो रमन्ते मधुपैः (१) सह ॥ १२३ ॥
अयाचितः सुखं दत्ते याचितश्च न यच्छति ।
सर्वस्वञ्चापि हरते विधिरत्यन्तवङ्कलो (२) नृणाम् ॥ १२४ ॥
दोर्दण्डद्वयकुण्डलीकृततनुस्तत्कोदण्डचण्डाग्रुग-
ध्वस्तोद्दण्डविपक्षमण्डलमथ त्वां वीक्ष्य मध्येरणम् (३) ।
वल्गद्गाण्डिवमुक्तकाण्डवलयज्वालावलीताण्डव-
भ्रश्यत्खाण्डवरुद्रपाण्डव-(४) महो को न क्षितीशः स्मरेत् ॥ १२५ ॥
खण्डितानेकझञ्झालि-(५) मञ्जुरञ्जनपण्डिताः ।
मण्डिताखिलदिक्प्रान्तास्तुण्डांशोः पान्तु भानवः ॥ १२६ ॥

इति श्रीमत्पण्डितराजजगन्नाथकविविरचिते भामिनीविलासे
प्रास्ताविको नाम प्रथमो विलासः ।

न मनागपि राहुरोधशङ्का
न कलङ्कानुगमो न पाण्डुभावः ।

(१) राज्ञः चन्द्रस्य रूपस्येति ध्वनिः प्रियाः भार्याः प्रीतिभाजश्च । मधुपैः भ्रमरैः मद्यपायिभिश्चेति ध्वनिः ।
(२) उच्छृङ्खलः प्रतिकूलः ।
(३) मध्येरणं रणमध्येऽव्ययीभावः ।
(४) गाण्डिवं पार्थधनुः । काण्डः बाणः । पाण्डवः अर्जुनः ।
(५) खण्डिता विदलिता । झञ्झालिः जलजन्मेत्यौ तस्या मधुररञ्जने हृद्यानुरागसम्पादने पण्डिताः दक्षाः । भानवः किरणाः ।

Digitized by Google

उपचीयत एव कापि शोभा।
परितो भामिनि! ते मुखस्य नित्यम्॥ १॥
नितरां पद्मा सरोजमाला
न मृणालानि विचारपेशलानि।
यदि कोमलता तवाङ्गकाना-
मथ का नाम कथापि पल्लवानाम्॥ २॥
खेदाम्बुसान्द्रकणशालिकपोलपाली-(१)
दोलायितश्रवणकुण्डलवन्दनीया।
आनन्दमङ्कुरयति स्मरणेन कापि
रम्या दृशा मनसि मे महिरेक्षणायाः॥ ३॥
कस्तूरिकातिलकमालि! विधाय सायं
क्षीराननां सपदि शीलय सौधमौलिम्।
प्रौढिं भजन्तु कुमुदानि मुदा-(२) मुदारा-
मुल्लासयन्तु परितो हरितो मुखानि॥ ४॥
तन्मञ्जु मन्दहसितं श्वसितानि तानि
सा वै कलङ्कविधुरा मधुराननश्रीः।
अद्यापि मे हृदयमुन्मदयन्ति हन्त
सायन्तनाम्बुजसहोदरलोचनायाः (३)॥ ५॥

---

(१) कपोलपाली कपोलापम्।
(२) मुदां हर्षाणाम् उदारां श्रेष्ठां प्रौढिं दृढिम्।
(३) मुकुलितनेत्रायाः इत्यर्थः।

Digitized by Google

प्रातस्तरां प्रणमने विहिते गुरूणा-
माकर्ण्य वाचममलां भव पुत्रिणीति ।
नेदीयसि (१) प्रियतमे परमप्रमोद-
पूर्णादरं दयितया दधिरे दृगन्ताः (२) ॥ ६ ॥
गुरुजनभयसंहिलोकनान्तः-
समुदयदाकुलभावमुद्वहन्त्याः ।
दरदलदरविन्दसुन्दरे हा
हरिणदृशो नयने न विस्मरामि ॥ ७ ॥
वदरामलकास्रदाड़िमानामपहृत्य श्रियमुन्नतौ क्रमेण ।
अधुना हरणे कुचौ यतेते दयिते! ते करिशावकुम्भलक्ष्माणः॥८॥
कपोलपालीं तव तन्वि ! मन्ये
लावण्यधन्ये ! दिशमुत्तराख्याम् ।
आभाति यस्यां ललितालकायां
मनोहरां वै श्रवणस्य (३) लक्ष्मीः ॥ ९ ॥
नीवीं नियम्य शिथिलामुषसि प्रकाश-
मालोक्य वारिजदृशः शयनं जिहासोः ।
नैवावरोहति कदापि च मानसाम्भे
नाभेः प्रभा सरसिजोदरसोदरायाः ॥ १० ॥

---

(१) नेदीयसि अत्यन्तनिकटवर्त्तिनि ।
(२) दृशोरन्ताः अञ्चलाः दधिरे धृताः कटाक्षेण दृष्टमित्यर्थः ।
(३) अलकाः ललाटस्थचूर्णकुन्तलाः कुबेरपुरी चालका । वैश्रवणस्य कुबेरस्य ।
अथ च वै प्रसिद्धे श्रवणस्य कर्णस्य ।

Digitized by Google

सुधैव नक्तं परिकल्प्य गन्तुं
मृषैव रोषादुपजल्पतो मे।
उदश्रुचञ्चन्नयना नताङ्गी
गिरं न कां कामुररीचकार ॥ ११ ॥
तदवधि कुशली पुराणशास्त्र-
स्मृतिशतचारुविचारजो विवेकः।
यदवधि न पदं दधाति चित्ते
हरिणकिशोरदृशोर्विलासः ॥ १२ ॥
आगतः पतिरितीरितं जनैः
शृण्वती चकितमेत्य देहलीम्।
कौमुदीव शिशिरीकरिष्यते
लोचने मम कदा मृगेक्षणा ? ॥ १३ ॥
अवधौ दिवसावसानकाले
भवनद्वारि विलोचने दधाना।
अवलोक्य समागतं तदा मा-
मथ रामा विकसन्मुखी बभूव ॥ १४ ॥
वक्षोजाग्रं पाणिनामृश्य दूरं
यातस्य द्रागाननाब्जं प्रियस्य।
श्रोणाग्राभ्यां भामिनी लोचताभ्यां
जोषं जोषं (१) जोषमेवावतस्थे ॥ १५ ॥

(१) द्राक् शीघ्रं दूरं यातस्य प्रियाया मुखपद्मं रक्तापाङ्गाभ्यां लोचनाभ्यां जोषं जोषं संसेव्य आभीक्ष्ण्ये द्वित्वम्। जोषं तूष्णीमेवावतस्थे।

Digitized by Google

गुरुभिः परिवेष्टितापि गण्ड-
स्थलकण्डूयनचारुकैतवेन ।
दरदर्शितहेमबाहुनाला
मयि बाला नयनाञ्चलं चकार ॥ १६ ॥
गुरुमध्यगता मया नताङ्गी
निहता नीरजकोरकेण (१) मन्दम् ।
दरकुण्डलताण्डवं नतभ्रू-
लतिकं मामवलोक्य घूर्णितासीत् ॥ १७ ॥
विनये नयनारुणप्रसारः
प्रणतौ हन्त निरन्तराश्रुधाराः ।
अपि जीवितसंशयः प्रयाणे
न हि जाने हरिणाक्षि ! केन तुष्ये ? ॥ १८ ॥
अकरुण ! मृषा वाचं ब्रूषे विमुञ्च ममाञ्चलं
तव परिचितः स्नेहः सम्यङ्नयेत्यभिधायिनीम् ।
अविरलगलद्बाष्पां तन्वीं निरस्तविभूषणां
क इव भवतीं भद्रे ! निद्रे ! विना विनिवेदयेत् ॥ १९ ॥
तीरे तरुण्या वदनं सहासं
नीरे सरोजञ्च मिलद्विकासम् ।

---

(१) नीरजकोरकेण पद्मकलिकया मन्दं निहता ताडिता सती मामवलोक्य दरभीषत् कुण्डलयोर्लताण्डवः नर्त्तनं यत्र तद्यथा तथा सती भ्रू-लतिके यत्र तद्यथा तथा च घूर्णितासीत् ।

Digitized by Google

आलोक्य धावत्युभयत्र मुग्धा- (१)
मरन्दलुब्धालिकिशोरमाला ॥ २० ॥
वीक्ष्य वक्षसि विपक्षकामिनी-
हारलक्ष्म दयितस्य भामिनी (२)।
अंसदेशविनिवेशितां क्षणा-
दाचकर्ष निजबाहुवल्लरीम् ॥ २१ ॥
दूरानमत्कन्धरबन्धमीष-
न्निमीलितस्निग्धविलोचनाब्जम्।
अनल्पनिश्वासभरालसाङ्गं
स्मरामि सङ्गं चिरसङ्गनायाः ॥ २२ ॥
रोषावेशान्निर्गतं यामयुग्मा-
देत्य द्वारं काश्चिदाख्यां गृणन्तम्।
मामाज्ञायैवायथौ कातराक्षी
मन्दं मन्दं मन्दिरादिन्दिरेव (३) ॥ २३ ॥
हृदये कृतश्रैवलानुसङ्गा
मुञ्चरङ्गानि यतस्ततः क्षिपन्ती
प्रियनामपरे मुखे सखीना-
मतिदीनामियमादधाति दृष्टिम् ॥ २४ ॥

---

(१) मुग्धा मूढा कुल गन्तव्यमिति निश्चयमूढेत्यर्थः। मरन्दः मकरन्दः।
(२) भामिनी ईर्ष्यावशात् क्रोधना।
(३) इन्दिरा लक्ष्मीः।

Digitized by Google

इत एव निजालयं गताया
वनिताया गुरुभिः समादृताया: ।
परिवर्त्तितकन्धरं नतभ्रु
स्मयमानं वदनाम्बुजं स्मरामि ॥ २५ ॥
कथय कथमिवाशा जायतां जीविते मे
मलयभुजगवान्ता (१) वान्ति वाताः कृतान्ताः ।
अयमपि खलु गुञ्जन् मञ्जु माकन्दमौलौ (२)
चुलुकयति मदीयां चेतनां चञ्चरीकः ॥ २६ ॥
निरुध्य यान्तीं तरसा कपोतीं कूजत्कपोतस्य पुरो दधाने ।
मयि स्मितार्द्रं वदनारविन्दं मा मन्दमन्दं रमयाम्बभूव ॥२७॥
तिमिरं हरन्ति हरितां पुरःस्थिता-
स्थिरयन्ति तापमथ तापशालिनाम् ।
वदनत्विषस्तव चकोरलोचने ! ।
परिमुद्रयन्ति सरसीरुहश्रियः ॥ २८ ॥
कुचकलशयुगान्तर्मामकीनं नखाङ्कं
सपुलकतनु (३) मन्दं मन्दमालोकमाना ।
विनिहितवदनं मां वीक्ष्य बाला गवाक्षे
चकिततनु नताङ्गी सद्य सद्यो विवेश ॥ २९ ॥

---

(१) वाप्ता उद्गीर्णाः कृतान्ता यमतुल्याः वियोगिनाशकत्वात् ।
(२) माकन्दमौलौ चूतशिखरे स्थितः चञ्चरीकः भ्रमरः ।
(३) सपुलका जातरोमाञ्चा तनुर्यस्य कर्मणि तथालोकमाना ।

Digitized by Google

विधाय सा मद्दनानुकूलं
कपोलमूलं हृदये शयाना (१)।
तन्वी तदानीमतुलां बलारेः (२)
साम्राज्यलक्ष्मीमधरीचकार ॥ ३० ॥
मुहुरर्थितयाद्य निद्रया मे
वत यामे चरमे निवेदितायाः।
चिबुकं सुहृशो मृशामि याव-
न्मयि तावन्निहिरोऽपि (३) निर्दयोऽभूत् ॥ ३१ ॥
श्रुतिशतमपि भूयः शीलितं भारतं वा
विरचयति तथा नो हन्त सन्तापशान्तिम्।
अपि सपदि यथायं केलिविश्रान्तकान्ता-
वदनकमलनालात् कान्तिसान्द्रो नकारः ॥ ३२ ॥
लवलीं (४) तव लीलया कपोले कवलीकुर्वति कोमलत्विषा।
परिपाण्डुरपुण्डरीकखण्डे परिपेतुः परितो महाधयः ॥ ३३ ॥
यौवनोद्गमनितान्तशङ्किताः शीलशौर्यबलकान्तिलोभिताः।
सङ्कुचन्ति विकसन्ति राघवे जानकीनयननीरजश्रियः ॥ ३४ ॥

---

(१) हृदये शयाना मानसवर्त्तिनी।
(२) बलारेः इन्द्रस्य।
(३) निहिरः क्रूरः उदयेनाभिलाषप्रतिकूलत्वात् तस्य निर्दयत्वम्।
(४) कपोले कोमलत्विषा लीलया लवलीं लताविशेषं कवलीकुर्वति अधरीकुर्वति सति महाधयः महाव्यथा स्वापेक्षया अधिकसौकुमार्याया अपि लवल्या लीलयैव कपोलेन तिरस्करणात् ममावश्यं तिरस्कारो भविष्यतीति पद्मसमूहे मानसव्यथा जाता इत्यर्थः।

Digitized by Google

अधिरोप्य हरस्य हन्त चापं
परितापं प्रशमय्य बान्धवानाम् ।
परिणेष्यति वा न वा युवायं
निरधारि मिथिलाधिनाथपुत्रीम् (१) ॥ २५ ॥

भुजपञ्जरे गृहीता नवपरिणीता वरेण रहसि वधूः ।
तत्कालजालपतिता बालकुरङ्गीव वेपते नितराम् ॥ २६ ॥

उपनिषदः परिपीता गीता च हन्त मतिपथं नीता ।
तदपि न हा विधुवदना मानसमुदनाद् बहिर्याति ॥ २७ ॥

अकरुणहृदय ! प्रियतम ! मुञ्चामि त्वामितः परं नाहम् ।
इत्यालपति करास्बुजमादायालीजनस्य विकला सा ॥ २८ ॥

लोभाद् वराटिकानां विक्रेतुं तक्रमविरतमटन्त्या ।
लब्धो गोपकिशोर्या मथेरग्रं महेन्द्रनीलमणिः ॥ २९ ॥

रूपारुचिं निरसितुं रसयन्त्या हरिमुखस्य लावण्यम् (२) ।
सुदृशः शिव शिव सकले जाता सकलेरेव जगत्यरुचिः ॥ ३० ॥

किं जल्पसि मुग्धतया हन्त ममाङ्गं सुवर्णवर्णमिति ।

---

(१) अयं पुरा मिथिलाधिनाथपुत्रीं परिणेष्यति न वेति संशये राघवेण हरचापं अधिरोप्य बान्धवानां परितापं हरचापस्य दुरारुर्कत्वात् तदारोपकरणाद्विलम्बेन सीताया विवाहो दुष्कर इति चिन्तां प्रशमय्य च निरधारि निर्द्धारितः अनेनैव परिणेष्यते इति निश्चायितम् ।

(२) रूपे सौन्दर्ये अरुचिमप्रीतिं निरसितुं निवारयितुं हरिमुखस्य अप्रसन्नस्यैव लावण्यं कान्तिविशेषं स्वयमयरसञ्च रसयन्त्या आस्वादयन्त्या आस्वादयतश्च । सकलेः हरिमुखकलङ्कसहितायाः इव सुदृशः सुन्दरदृष्टेः सकलेऽपि जगति अरुचिर्जाता तदपेक्षयाऽधिकसौन्दर्याभावात् अन्यत्र प्रीतिर्नाभूत् अन्यैः इतररसे अरुचिनिवारणार्थं स्वयंरस एव प्रातरास्वाद्यते इत्यप्रसिद्धमस्वादनमस्यप्रसिद्धम् ।

Digitized by Google

तप्यति पतति ऊताग्रे तदा हृताग्रे तुलां तवारोहेत् ॥ ४१ ॥
औत्सुक्यात् परिमिलतां त्वयेव सङ्कोचमञ्चनाच्च मुहुः।
नवसङ्गमयोर्धूनोर्नयनानामुत्सवो जयति ॥ ४२ ॥
गरिमाणमर्पयित्वा (१) लघिमानं कुचतटात् कुरङ्गदृशाम्।
स्वीकुर्वते नमस्तेषां यूनां धैर्य्याय निर्विवेकाय ॥ ४३ ॥
अञ्चति वयसि प्रथमे समुदञ्चति तरुणिवि तदा सुहृदः।
दधति स्म मधुरिमाणं वाचो गतयश्च विभ्रमाश्च भ्रूणम् ॥ ४४ ॥
निःसीमशोभासौभाग्यं नताङ्ग्या नयनद्वयम्।
अनन्यालोकनानन्दविरहादिव चञ्चलम् ॥ ४५ ॥
गुरुमध्ये हरिणाक्षी मार्त्तिकशकलैर्निहन्तुकामं माम्।
रदयन्त्वितरसनाग्रं तरलितनयनं निवारयाञ्चक्रे ॥ ४६ ॥
नयनाञ्चलावमर्शं या न कदाचित् पुरा कथं सेहे।
आलिङ्गितापि जोषं तस्थौ सागन्तुकेन दयितेन ॥ ४७ ॥
मानपराञ्चदनापि सा प्रिया शयानैव करकमले।
उद्वेल्लद्भुजमलसग्रीवाबन्धं कपोलमाधत्ते ॥ ४८ ॥
लोचनफुल्लाम्भोजद्वयलोभान्दोलितैकमनाः शुभे!।
कस्तूरीतिलकमिषादयमलिकेलिस्खलीलसति ॥ ४९ ॥
अधिरजनि प्रियसविधे कथमपि संवेशिता बलाद् गुरुभिः।
किं भवितेति नु शङ्कां पङ्कजनयना परं भृशति ॥ ५० ॥

---

(१) गरिमाणं गुरुत्वमस्तेति शेषः अर्पयित्वा कुचतटे दत्त्वेत्यर्थः कुचतटात् लघिमानं स्वीकुर्वते आदत्ते अत एव लघु गुरु विनिमयेन विवेक-शून्यत्वात्।

Digitized by Google

चिन्तामीलितमानसो मनसिजः, सख्यो विहीनप्रभाः,
प्राणेशः प्रणयाकुलः, पुनरसावास्तां समस्ता कथा।
एतत्त्वां प्रतिबोधयामि मम चेदुक्तिं हितां मन्यसे
मुग्धे! मा कुरु मानमाननमिदं राकापतिर्जेष्यति॥ ५१॥

मलङ्कर्त्तुं कर्णौ भृशमनुभवन्त्या नवरुजां
सशीत्कारं तिर्य्यग्वलितवदनाया मृगदृशः।
कराजव्यापारानतिसुकृतसारान् रसयतो
जनुः सर्व्वं श्लाघ्यं जयति ललितोत्तंस! (१) भवतः॥ ५२॥

आयातैव निशा निशापतिकरैः कीर्णं दिशामन्तरं
भामिन्या भवनेषु भूषणगणैरङ्गानि संस्कुर्व्वते।
मुग्धे! मानमपाकरोषि न मनागद्यापि रोषेण ते
हा हा बालमृणालवत्योऽप्यतितरां तन्वी तनुस्ताम्यति॥ ५३।

वाचं माङ्गलिकीं प्रयाणसमये जल्पत्यनल्पं जने
केलीमन्दिरमारुतायनमुखे (२) विन्यस्तवक्त्राम्बुजा।
निःश्वासस्तपिताधरं परिमृतहास्यार्द्रवत्तीरुहा
बाला खोलविलोचना शिव शिव प्राणेशमालोकते॥ ५४॥

दारिद्र्यं भजते कलानिधिरयं राकाधुना ध्यायति
खेदं कैरवकाननेषु परितो मालिन्यमुन्मीलति।
द्योतन्ते हरिदन्तराणि सुहृदां वृन्दं खमानन्दति
त्वच्चेदस्यसि काञ्चनाङ्गि! वदनाम्भोजे विकासश्रियम्॥ ५५॥

---

(१) हे ललितोत्तंस रम्यकर्णभूषण भवतः सर्व्वं जनुः जन्म श्लाघ्यम्।
(२) केलिमन्दिरमारुतायनमुखे केलिगृहमवाचमुखे।

Digitized by Google

पटीरद्रुभुजङ्गपुङ्गवमुखाद् याता इवातापिनो
वाता वान्ति दहन्ति लोचनममी ताप्ता रसालद्रुमाः ।
एते हन्त किरन्ति कूजितमथं हालाहलं कोकिला-
बाला बालमृणालकोमलतनुः प्राणान् कथं रक्षतु ॥ ५६ ॥
आयातैव निशा मनो मृगदृशामुल्लिद्रमातन्वती
मानो मे कथमेव सम्प्रति निरातङ्कं हृदि स्थास्यति ? ।
उन्नीयोहमिमं सरोजनयना यावद्विधत्ते त्वरां
तावत् कामनृपातपत्रसुषमं विम्बं बभासे विधोः (१) ॥ ५७ ॥
प्रभातसमयप्रभां प्रणयनिह्नुवाना रसा-
दमुष्य निजपाणिना हृदयमीलयल्लीलया ।
अयन्तु खलु पद्मिनीपरिमलालिपाटच्चरो
रवेरुदयमध्यगादधिकचारु तैर्मारुतैः (२) ॥ ५८ ॥
विदूरादाश्चर्यस्तिमितमथ किञ्चित् परिचया-
दुदञ्चच्चाञ्चल्यं तदनु परिविस्फारितरुचि ।

---

(१) मृगदृशां मृगाक्षीणां मनः उल्लिद्रं विगतनिद्रम् आतन्वती कुर्वती निशा आयातैव मे मानः हृदि निरातङ्कं कथं स्थास्यति ? नैव स्थास्यतीत्यर्थः दृढम् अवलम्बीय लत्वा त्वरां वेगादिकार्यार्थं कालातिक्रियुतां यावत् विधत्ते तावत् कामनृपातपत्रसुषमं कामनृपतिच्छत्रशोभं विधोर्बिम्बं मण्डलं बभासे शुशुभे ।

(२) प्रणयेन निह्नुवाना कृत्रिमभावमिति शेषः तृतीयासमासः न तु द्वितीयासमासः । गोपवन्ती कामिनीति शेषः अमुष्य नायकस्य भ्रमरस्य रसात् अनुरागात् लीलया भ्रूकारजभावविशेषेण निजपाणिना प्रभातसमयप्रभां प्रभातकालकान्तिं हृदयम् अमीलयत् प्रोन्मूलनेन प्राकाशयत् । अयन्तु पद्मिनीपरिमलस्य पद्मसौरभस्य अलिरूपः पाटच्चरः चौरः तैः प्रभातकालप्रसिद्धैः मारुतैः अधिकचारु यथा तथा रवेरुदयम् अध्यगात् प्राप ।

Digitized by Google

गुरूणां संघाते सपदि मयि याते समजनि
त्वपाघूर्णत्तारं नयनमिह सारङ्गजदृशः (१) ॥ ५९ ॥
कपोलावुन्मीलत्पुलकनिकुरम्बे मयि मनाङ्-
मृगत्यक्तःस्रेरस्तवकितमुखाम्भोरुहरुचेः ।
कथङ्कारं ब्रूमाः ? परिगदितुमिन्दीवरदृशो
लसद्वाचानिर्य्यद्रसभरमपत्रा भणितयः (२) ॥ ६० ॥
राजानं जनयाम्बभूव सहसा जैवातृक ! त्वान्तु यः (३)
सोऽयं कुण्ठितसर्व्वशक्तिनिकरो जातो जरार्त्तो विधिः ।
सम्प्रत्युन्मदखञ्जरीटनयनावक्षाय नित्यश्रिये
दाता राज्यमखण्डमस्य जगतो धाता नवो मन्मथः ॥ ६१ ॥
आविर्भूता यदवधि मधुस्यन्दिनो नन्दसूनोः
कान्तिः काचिन्निखिलनयनाकर्षणे कार्म्मणघ्नी (४) ।
श्वासो दीर्घस्तदवधिमुखे, पाण्डिमा गण्डमूले,
शून्या दृष्टिः कुलमृगदृशां चेतसि प्रादुरासीत् ॥ ६२ ॥

---

(१) गुरूणां सङ्घाते सन्निकर्षे सारङ्गजदृशः मृगशावाक्ष्या नयनं त्वपत्रा लक्ष्यत्रा घूर्णन्ती तारा यस्य तादृशं समजनि सञ्जातम् ।

(२) लसन्त्या द्राक्षायाः निर्य्यतः निष्यन्दमानस्य रसस्य सपत्राः तुल्याः भणितयः कथमानि भाङ्गे क्विन् स्टहीत्यादिनादिट् । परिगदितुं वर्णयितुं कथङ्कारं कथम् यसुक् कथं कृत्वा ब्रूमाः नैव शक्ता वयं इत्यर्थः ।

(३) हे जैवातृक ! जीवनाथधिन ! चन्द्र ! त्वां राजानं सर्व्वसौन्दर्य्यातिशयात् श्रेष्ठं यो विधिः जनयामास सोऽयं विधिः कुण्ठितसर्व्वशक्तिनिकरः चन्द्रनिर्म्माणे च सर्व्वसौन्दर्य्यसाधनद्रव्यस्य प्रचीनत्वात् कुण्ठितसामर्थ्यः जरसा आर्त्तश्च जातः अतः तस्य सामर्थ्याभावात् मन्मथ एव नवोऽभिनवो विधाता सन् अस्य जगतः अखण्डं राज्यं नित्यश्रिये सर्व्वदा शोभनाय उन्मदखञ्जरीटनयनावक्षाय दाता दास्यतीत्यर्थः खुट् शीलार्थे वा तृच् तेन न कर्म्मणि षष्ठी ।

(४) कार्म्मणघ्नम् (जादु) इति प्रसिद्धकौशलभेदस्तत्र कुशला ।

Digitized by Google

प्रसङ्गे गोपानां गुरुषु महिमानं यदुपते-
रुपाकर्ण्य स्विद्यत्पुलकितकपोला कुलवधूः ।
विषज्वालाजालं धगिति वमतः पन्नगपतेः
फणायामाश्चर्य्यं स्थगयतितरां ताण्डवविधिम् (७) ॥ ६३ ॥
कैशोरे वयसि क्रमेण तनुतामायाति तन्व्यास्तना-
वागामिन्यखिलेश्वरे रतिपतौ तत्कालमस्याश्रया ।
आस्ये पूर्णशशाङ्कता, नयनयोस्तादात्म्यमब्जोरुहां
किञ्चासीदमृतस्य भेदविगमः साचिस्मिते तात्त्विकः (८) ॥ ६४ ॥
ग्रथिता गैवलशयने सुषमाशेषा नवेन्दुलेखेव ।
प्रियमागतमपि सविधे सत् कुरुते वीक्षणैरेव ॥ ६५ ॥
विरहेण विकलहृदया विलपन्ती दयित ! दयितेति ।
प्रियमागतमपि सविधे परिचयहीनेव वीक्षते बाला ॥ ६६ ॥

---

(१) गोपानां गोरक्षकाणां प्रसङ्गे वनहस्तान्तकथान्तरे धगिति द्रुतं रूपेण विषाणि ज्वाला इव तज्ज्वालं वमतः पन्नगपतेः कालीयसर्पस्य फणायाम् आश्चर्य्यं निर्भीकत्वेनाभूतपूर्व्वं यदुपतेः ताण्डवविधिं ऋत्विधानं तद्वृत्तान्तमित्यर्थः उपाकर्ण्य श्रुत्वा कुलवधूः स्विद्यत्पुलकितकपोला तद्वृत्तान्तश्रवणेन हरेः यज्ञव्रतकर्षणज्ञानात् जातविस्मयत्वेन तत्प्रानुरागाधिक्यात् जातघर्म्मतया व्यक्तस्कारभावा सती गुरुषु गुरुसमीपे गरिमाणं गौरवं लब्धारोहित्वेन आदरं स्थगयतितराम् अतिशयेन त्यजतीत्यर्थः ।

(२) तन्व्याः कैशोरे वयसि क्रमेण तनुतामायाति सति अखिलेश्वरे रतिपतौ कामे सुनौ आगामिनि आगमिष्यति सति भव्यार्थत्वात् क्रियायोगे सुनावित्यत्र न कर्म्मणि षष्ठी । अस्य कामस्याश्रया तत्कालं तन्व्या आस्ये मुखे पूर्णशशाङ्कता, नयनयोः अम्भोरुहां पद्मानां तादात्म्यमभेदः, साचिस्मिते वैदग्ध्यसिते वक्त्रे तात्त्विकः यथार्थः अमृतस्य सुधाया भेदविगमः भेदराहित्यमासीत् ।

Digitized by Google

अधरद्युतिरक्तपल्लवा (१) मुखशोभा प्रभिकान्तिलक्ष्मिणी ।
तनुरप्रतिमा च सुभ्रुवो न विधेरस्य कृतिं विवक्षति ॥ ६७ ॥
व्यत्यस्तं लपति क्षणं क्षणमहो मौनं समालम्बते
सर्व्वस्मिन् विदधाति किञ्च विषये दृष्टिं निरालम्बनाम् ।
श्वासं दीर्घमुरीकरोति न मनागङ्गेषु धत्ते धृतिं
वैदेहीविरहव्यथाविकलितो हा हन्त लङ्केश्वरः ॥ ६८ ॥
उदितं मण्डलमिन्दोरुदितं सद्यो वियोगिवर्गेण ।
मुदितञ्च सकललनाचूड़ामणिशासनेन मदनेन ॥ ६९ ॥
प्रादुर्भवति पयोदे कज्जलमलिनं बभूव नभः ।
रक्तश्च पथिकहृदयं कपोलपाली मृगदृशः पाण्डुः ॥ ७० ॥
हृदमप्रतिमं पश्य सरः सरसिजैर्वृतम् ।
सखे ! मा गल्प नारीणां नयनानि दहन्ति माम् ॥ ७१ ॥
मुञ्चसि नाद्यापि रुषं भामिनि ! मुदिरालिरुदियाय ।
इति सुदृशः प्रियवचनैरपायि नयनाब्जकोणश्रोणरुचिः(२) ॥७२॥

आलोक्य सुन्दरि ! मुखं तव मन्दहासं
मन्दस्यमन्दमरविन्दधिया मिलिन्दाः ।
किञ्चाधिताधि ! मृगलाञ्छनसम्भ्रमेण
चञ्चूपुटं चटुलयन्ति चिरं चकोराः ॥ ७३ ॥

---

(१) अधरपल्लवा निरक्तपल्लवा । अत एव सुभ्रुवः अप्रतिमा अन्यसाधारणरहिता तनुः । अस्य विधेः विधातुः न कृतिं विवक्षति वक्तुमिच्छति प्रकाशयतीत्यर्थः ।
(२) नयनाब्जकोणस्य कटाक्षप्रान्तस्य या श्रोणरुचिः प्रियवचनेन रक्तकान्तिः सा प्रियवचनैः अपायि पीता निःशेषमापादितेत्यर्थः पातेः कर्म्मणि क्विप् ।

Digitized by Google

स्मितं नैतत् किन्तु प्रकृतिरमणीयं विकसितं
मुखं ब्रूते को वा कुसुममिदमुद्यत्परिमलम् ।
स्तनद्वन्द्वं मिथ्या कनकनिभमेतत् फलयुगं
लता सेयं रम्या भ्रमरकुलनम्या न रमणी ॥ ७४ ॥

संग्रामाङ्गनसम्मुखाहतकियद्विश्वम्भराधीश्वर-
व्यादीर्णीकृतमध्यमाङ्कविवरोन्मीलन्नभोनीलिमा (१) ।
अङ्गारप्रखरैः करैः कवलयन्नेतन्महीमण्डलं
मार्त्तण्डोऽयमुदेति केन ? पशुना लोके ब्रह्माङ्कीकृतः ॥ ७५ ॥

श्यामं सितञ्च सुहृद्यो न हृद्यो: स्वरूपं
किन्तु स्फुटं गरलमेतदथामृतञ्च ।
नो चेत् कथं निपतनादनयोस्तदैव
मोहं मुदञ्च नितरां दधते युवानः (२) ॥ ७६ ॥

---

(१) संग्रामाङ्गने सम्मुखमाहताः वैरिभिः अपलायमानतया नाशिता ये कियन्तः विश्वम्भराधीश्वराः राजानः तैः व्यादीर्णीकृतं विदारितं यत् मध्यमाङ्कं मध्यभागः तस्य विवरेण तच्छिद्रेण उन्मीलन् प्रकाशमानः नभोनीलिमा वियन्नैल्यं यत्र । तादृशः संग्रामकृतरूपविदारितमध्यभागतया तच्छिद्रेण प्रकाशमानवियन्नीलिमैव सूर्य्ये दृश्यते न तु अयं कलङ्कः । कलङ्क रूपेण भानम् अज्ञानकल्पितमिति भावः । सूर्य्यमण्डलभेदेन ब्रह्मलोकगमनं शास्त्रसिद्धम् । अयं रात्रौ उद्यन् चन्द्रः मार्त्तण्ड एव तत्र हेतुः पूर्व्वार्द्धोक्तः केनचित् पशुना अज्ञानेन यथाङ्कः मयरूपमृगाङ्कचक्रेण कृतः कल्पितः न तु वास्तविकः चन्द्र इत्यर्थः ।

(२) नोचेत् अन्यथा विषामृततत्वाभावे इत्यर्थः युवानः कथम् अनयोर्नयनयो-र्निपतनात् आदरातिशयेन सेवनात् मोहं विवेकशून्यत्वं मुदं हर्षञ्च दधते तथा च ततृषेऽने मोहहर्षयोर्हेतुत्वात् नेत्रमतस्यामप्रेतां-श्चयोर्विषामृतरूपत्वमिति भावः ।

Digitized by Google

अलिर्मृगो वा नेत्रं वा यत्र किञ्चिन्न भाषते ।
अरविन्दं मृगाङ्को वा मुखं वेदं मृगीदृशः ॥ ७७ ॥

हयिते ! वदनत्विषां मिषादयि तेऽमी विलसन्ति केशराः ।
अमी चालकवेषधारिणो मकरन्दस्पृहयालवोऽलयः ॥ ७८ ॥

अनिशं नयनाभिरामया
रमया संवदिनो मुखस्य ते ।
निशि निःसरदिन्दिरं (१) कथं
तुलयामः कलयापि पङ्कजम् ॥ ७९ ॥

अङ्गैः सुकुमारतरैः सा कुसुमानां श्रियं हरति ।
विकलयति कुसुमबाणो बाणालीभिर्मम प्राणान् ॥ ८० ॥

खिद्यति सा पथि यान्ती कोमलचरणा नितम्बभारेण ।
खिद्यामि हन्त परितस्तदुपविलोकनेन विकलोऽहम् ॥ ८१ ॥

मथुरागमनोन्मुखे मुरारा-
वसुभारार्त्तिभृतां व्रजाङ्गनानाम् (२) ।
प्रलयज्वलनायते स्म राका
भवनाकाशमशायताब्धुराशिः ॥ ८२ ॥

---

(१) निशि रात्रौ निःसरन्ती इन्दिरा शोभा यस्मात् तादृशं पङ्कजं कथं कलयाम नैवेत्यर्थः ।

(२) असव एव दुर्वहत्वात् भारास्तैरार्त्तानां दुःखितानाम् अतिभारार्त्तानामिति पाठः साधुः । राका पूर्णचन्द्रापि तिथिः प्रलयज्वलनायते प्रलयवह्निरिव भवति स्म । भवनाकाशं स्वर्गावकाशस्थानमपि अब्धुराशिः समुद्र इवाचरत अम्भसा जलेन पूर्णत्वात् ।

Digitized by Google

केलीमन्दिरमागतस्य शनकैरालीरपास्येङ्गितैः
सुप्तायाः सरुषः सरोरुहदृशः संवीजनं कुर्वतः ।
जानन्त्यापि अनभिज्ञयेव कपटव्यामीलिताक्ष्याः, सखि !
आन्तासीत्यभिधाय वक्षसि तया पाणिर्ममासञ्जितः (१) ॥८३॥

मान्थर्य्यमाप गमनं सह शैशवेन
रक्तं सहैव मनसाधरबिम्बमासीत् ।
किञ्चाभवन् मृगकिशोरदृशो नितम्बः
सर्व्वाधिको गुरुरयं स मनोरथेन (२) ॥ ८४ ॥

श्वासोऽनुमानवेद्यः शीतान्यङ्गानि निश्चला दृष्टिः ।
तस्याः सुभग ! कथेयं तिष्ठतु तावत् कथान्तरं कथय ॥ ८५ ॥

पाणौलुतः पाणिरिलासुतायाः (३)
सखेदकम्पो रघुनन्दनेन ।
हिमाम्बुसङ्गानिलविक्लवस्य
प्रभातपद्मस्य बभार शोभाम् ॥ ८६ ॥

अरुणमपि विद्रुमदण्डं मृदुलतरञ्चापि किसलयं बाले ! ।
अधरीकरोति नितरां तवाधरो मधुरिमातिशयात् ॥ ८७ ॥

---

(१) आन्तासीः सखीः इङ्गितैः अपाङ्ग अपवर्त्तन सुप्तायाः व्याजनिद्रितायाः सरुषः सप्रणयकोपायाः सरोजदृशः संवीजनं कुर्वतः मम पाणिः, जानन्त्यापि अनभिज्ञयेव तया "हे सखि ! आन्तासि" इत्यभिधाय वक्षसि निजहृदये आसञ्जितः आरोपितः ।

(२) शैशवेन सह गमनं गतिः मान्थर्य्यं मृदुतामाप, अधरबिम्बं मनसा सह रक्तं, शोणितवर्णमनुरागयुक्तञ्चासीत्, मनोरथेन सह नितम्बः गुरुः अतिभारः उत्कर्षान्वितश्च अभवत् ।

(३) इलासुतायाः सीतायाः पाणिः पाणौलुतः पाणिना गृहीत इत्यर्थः ।

Digitized by Google

नयने वहतो नु खञ्जनाना-
मिह नानाविधमङ्गने ! भयन्ते ।
सुखमेतु तुलां कथं सुशोभं
सुहृशो भङ्गुरसम्पदोऽम्बुजस्य (१) ॥ ८८ ॥

सुहृशो जितरत्नमालया सुरतान्तश्रमविन्दुमालया ।
अलकेन च नीलकान्तिना विदधे कापि हरिः परस्परम् ॥८९॥

परपरुषदृष्टिजातवज्रा-
हतिभीता हृदयं प्रियस्य सीता ।
अविशत् परकामिनीभुजगी-
भयतः सत्वरमेव सोऽपि तस्याः (२) ॥ ९० ॥

जम्बीरश्रियमतिलङ्घ्य लीलयैव
व्यानम्रीकृतकमनीयहेमकुम्भौ ।
नीलाम्भोरुहनयने ! श्रुना कुचौ ते
स्पर्द्धेते किल कनकाचलेन सार्द्धम् ॥ ९१ ॥

अङ्गानि दत्त्वा हेमाङ्गि ! प्राणान् क्रीणासि चेन्नृणाम् ।
युक्तमेतन्न तु पुनः कोणं नयनयुग्मयोः (३) ॥ ९२ ॥

---

(१) हे अङ्गने ! ते तव नयने खञ्जनानां नानाविधं भयं वहतः प्राप्नुवतः कुरुत इत्यर्थः तव सुखस्य भङ्गुरसम्पदः रात्रौ शिशिरकाले च भग्नश्रीकस्य अम्बुजस्य तुलां कथमेव प्राप्नोतु ।

(२) सोऽपि राघवोऽपि तस्याः सीतायाः हृदयं वक्षःस्थलम् अत्यरमविचिरादित्यनुषङ्गः ।

(३) नयनयुग्मयोः नेत्रद्वयस्य स्त्रित्वमविवक्षितं युग्मत्वेनैव स्त्रित्वप्राप्तेः कोणं कटाक्षमात्रमित्यर्थः दत्त्वा प्राणान् क्रीणासीत्यनुषङ्गः अल्पदानेन बहुक्रयणं मठवचिज्ज दृवायुक्तमित्यर्थः ।

Digitized by Google

शितरत्नरुचां सदा रदानां
सहवासेन परां मुदं ददानाम्।
विग्रहादधरीकरोति नासा-
मधुना साहसशालि मौक्तिकन्ते (१)॥ ८३॥
निभाल्य भूयो निजगौरिमाणं
मा नाम मानं सहसैव यासीः।
गृहेगृहे पश्य तवाङ्गवर्णा
मुधे! सुवर्णावलयो लुठन्ति (२)॥ ८४॥
करिकुम्भतुलामुरीजयोः
क्रियमाणां कविभिर्विशङ्कलैः।
कथमालि! श्रृणोषि सादरं
विपरीतार्थविदो हि योषितः॥ ८५॥
तिरस्कृती रोषवशात् परिष्वजन्
प्रियो मृगाक्ष्या ग्रथितः पराङ्मुखः।
किं दुःखितोऽसाविति कान्दिशीकया (३)
कदाचिदाघ्रात चिराय सस्वजे॥ ८६॥
चेलाञ्चलेनाननमीतरश्मिं
संवृण्वतीनां हरिदश्वरीणाम्।

---

(१) विग्रहात् वैग्रह्यात् भावप्रधानमिदं शब्दं। साहसशालि अशक्याध्यवसाय-वृत्तं मौक्तिकं ते तव नासामधरीकरोति अधरोकर्तुमिच्छतीति यत् तत् साहसमात्रं न तच्छक्यमित्यर्थः।

(२) गौरिमाणं गौरवं प्रीतत्वमित्यर्थः सुवर्णावलयः सुवर्णश्रेणयः गृहेगृहे लुठन्ति सन्तीत्यर्थः।

(३) कान्दिशीकया भीतयेत्यर्थः।

Digitized by Google

अजाङ्गनानां स्मरजातकम्पा-
दकाण्डसम्पातमियाय नीवी ॥ ९७ ॥
अधरेण समागमाद्रदानाम्
अरुणिम्ना पिहितोऽपि शुद्धभावः ।
हसितेन सितेन पक्षलाक्ष्याः
पुनरुल्लासमवाप जातपक्षः (१) ॥ ९८ ॥
सरसिरुहोदरसुरभावधरितविम्बाधरे ! मृगाक्षि ! तव ।
वरने शुचि मणिरदने ताम्बूलं केन लक्ष्येम ? वयम् ॥ ९९ ॥
ग्रथिता सविधेऽप्यनीश्वरा सफलीकर्त्तुमहो मनोरथान् ।
दयिता दयितानना‌म्बुजं दरमीलन्नयना निरीक्षते ॥ १०० ॥
किमिति ? क्षणमसि क्षणोदरि !
किं तव परकीयवृत्तान्तैः ? ।
कथय तथापि मुदे मम
कथयिष्यति पथिक ! तव जाया ॥ १०१ ॥
वदनारविन्दसौरभादिन्दिरेषु निपत्सु ।
मध्यधरार्थिनि सुहृदो दृशो जयन्त्यतिरुषा परुषाः ॥ १०२ ॥

इति श्रीमत्पण्डितराजजगन्नाथविरचिते भामिनीविलासे
शृङ्गारो नाम द्वितीयो विलासः ।

---

(१) जातपक्षः सुपर्वा रदानां समागमात् तेषां शुभकान्तीनां सङ्क्रमेण शुद्धभावः प्राप्तश्वेतिमा सन्नपि अधरेण अरुणिम्ना रक्ततया पिहितो वर्णान्तरमापादितोऽपि सितेन हसितेन पुनरुल्लासमवाप प्राप्तवान् ।

Digitized by Google

दैवे परागुदनशालिनि हन्त जाते
याते च सम्मति दिवं प्रति बन्धुरत्ने।
कस्मै मनः कथयितासि? निजामवस्थां
कः शीतलैः शमयिता? वचनैस्त्वदाधिम्॥ १॥
प्रत्युद्गता सविनयं सहसा पुरैव
स्नेहैः स्मरस्य सचिवैः सहसावलोकैः।
मामद्य मञ्जुरचनैर्वचनैश्च बाले!
हा खेदतोऽपि न कथं शिशिरीकरोषि?॥ २॥
सर्व्वेऽपि विस्मृतिपथं विषयाः प्रयाता
विद्याऽपि खेदकलिता विमुखी बभूव।
सा केवलं हरिणशावकलोचना मे
नैवापयाति हृदयादधिदेवतेव॥ ३॥
निर्व्वाणमङ्गलपदं त्वरया विगन्त्या
मुक्ता दयावति! दयापि किल त्वयासौ।
यन्मां न भामिनि! निभालयसि प्रभाते
नीलारविन्दमदभङ्गपदैः कटाक्षैः॥ ४॥
धृत्वा पदस्खलनभीतिवशात् करं मे
या रूढवत्यसि शिलाशकलं विवाहे।
सा मां विहाय कथमद्य विलासिनि! द्याम्
आरोहसीति? हृदयं मतधा प्रयाति॥ ५॥
निर्दूषणा गुणवती रसभावपूर्णा
सालङ्कृतिः श्रवणमङ्गलवर्णराजिः।

Digitized by Google

सा मामकीनकवितेव मनोऽभिरामा
रामा कदापि हृदयान्मम नापयाति (१) ॥ ६ ॥
चिन्ता प्रयाम सकलापि सरोरुहाणाम् (२)
चन्द्रोऽस्त विम्बमसमं सुषमामयासीत् ।
श्रूयुद्गतः कलकलः किल कोकिलानां
प्राणप्रिये ! यदवधि त्वमितो गतासि ॥ ७ ॥
सौदामनीविलसितप्रतिमान् (३) अकाण्डे
दत्त्वा कियन्त्यपि दिनानि महेन्द्रभोगान् ।
मन्त्रोज्झितस्य कृपतेरिव राज्यलक्ष्मी-
र्भाग्यच्युतस्य करतो मम निर्गतासि ॥ ८ ॥
केनापि मे विलसितेन ? समुद्गतस्य
कोपस्य किन्नु ? करभोरु ! वशंवदाऽभूः ।

---

(१) निर्दूषणा दोषशून्या शब्दार्थयोर्दोषशून्या च गुणवती औदार्यादियुता प्रसादमाधुर्यादियुता च रसस्य शृङ्गारस्य ये भावाः खेदकम्पादयस्तद्युता शृङ्गारादिरसैः भावैश्च संयुता सालङ्कृतिः कटककुण्डलाद्यन्विता उपमानादियुक्ता च अवधाय सङ्कलानां वर्णानामुच्चार्यमाणानां खण्टकानाञ्च अक्षराणां राजियत्र तादृशी रामा स्त्री मामकीनकवितेव मम हृदयात् कदापि नापयाति ।

(२) हे प्राणप्रिये ! यदवधि त्वमितः परिलोकमिति शेषः गतासि तदवधीत्यर्थात् सरोरुहाणां पद्मानां तत्त्वः चिन्ता पराजयभीतिरित्यर्थः । एवं चन्द्रविम्बकोकिलरवयोः स्फूर्त्तिः, सति हि खञ्जयिनि त्वन्मुखे खरे च तयोर्नैव सम्यक् प्रकाश इति भावः ।

(३) सदाऽस्मा एक दिक् तेनैकादिगित्यस्य सौदामनी विद्युत् तस्य विलसितप्रतिमान् अस्थिरानित्यर्थः महेन्द्रस्येव भोगान् कति दिनानि व्याप्य दत्त्वा मत्तमित्यर्थात् मन्त्रेण यथायथं मन्त्रोपायसामादिप्रयोगेण उज्झितस्य त्यक्तस्य नृपतेः राजलक्ष्मीरिव मम करतः हस्तात् अकाण्डे अनवसरे गतासि अष्टासि मृतासीत्यर्थः ।

Digitized by Google

यन्मां विहाय सहसैव पतिव्रतापि
यातासि सुक्तरमणीसदनं विदूरम् (१)। ८।
काव्यात्मना मनसि पर्य्यणमन् पुरा मे
पीयूषसारसदृशास्तव ये विलासाः।
तानन्तरेण रमणीरमणीयशीला
चेतोहरा सुकविता भविता कथं नः॥ १०॥
या तावकीनमधुरस्मितकान्तिकान्ते
भूमण्डले विफलतां कविषु व्यतानीत्।
सा कातराक्षि! सहसा त्वयि यातवत्यां
राकाधुना वहति वैभवमिन्दिरायाः (२)॥ ११॥
मन्दस्मितेन सुधया परिषिच्य या मां
नेत्रोत्पलैर्विकसितैरनिशं समीजे (३)।
सा नित्यमङ्गलमयी गृहदेवता मे

---

(१) हे करभोरु! केनापि अनिर्वाच्येन मे विलसितेन चेष्टितेन वस्तुतत्त्वस्य वस्तुस्थितस्य कोपस्य वर्षंवदा आवृत्ता अभूः। यत् पतिव्रतापि मां विहाय विदूरमतिदूरस्थं सुक्तानां सुक्तदेहानां नारीणां सदनं साध्वीभोग्यं स्त्रीलोकविशेषं यातासि।

(२) कविषु या राका पूर्णिमारात्रिर्विफलतां व्यतानीत् वैफल्ये हेतुमाह तावकीनेत्यादि भूमण्डलस्य धवलतासाधनावर्णनसमये त्वत्स्मितेनैव धावल्यं कविभिः वर्णितं न तु राकयेति तस्याः वैफल्यमिति भावः। हे कातराक्षि! अधीरलोचने, त्वयि सहसा यातवत्यां स्वर्गमिति शेषः सत्यां सा राकाऽधुना इन्दिरायाः लक्ष्म्याः वैभवं सम्प्रदं वहति शोभते इत्यर्थः।

(३) मन्दस्मितेन तदूपया सुधया प्रीतिकरत्वेन अमृततुल्येन यां परिषिच्य स्नपयित्वा विकसितैर्नेत्रोत्पलैः नयनरूपकुवलयैः अनिशं सततं समीजे अर्चितवती समः यजेर्लिट्। सा हृदयतो न याति सर्व्वथा चर्च्यते इत्यर्थः।

Digitized by Google

कामेश्वरी हृदयतो दयिता न याति ॥ १२ ॥
भूमौ स्थिता रमण ! नाथ ! मनोहरेति
सम्बोधनैर्यमधिरोपितवत्यसि द्याम् (१)।
स्वर्गं गता कथमिव क्षिपसि त्वमेण-
शावाक्षि। हा धरणिधूलिषु मामिदानीम् ॥ १३ ॥
लावण्यमुज्ज्वलमपास्य तुलञ्च शीलं
लोकोत्तरं विनयमर्थमयं नयञ्च।
एतान् गुणानशरणानथ माञ्च हित्वा
हा हन्त ! सुन्दरि ! कथं त्रिदिवं गतासि ॥ १४ ॥
कान्त्या सुवर्णवरया, परया च शुद्ध्या
नित्यं स्विकाः खलु शिखाः परितः क्षिपन्तीम् (२)।
चेतोहरामपि कुशेशयलोचने ! त्वां
जानामि कोपकलुषो दहनो ददाह ॥ १५ ॥
कर्पूरवर्त्तिरिव लोचनतापहन्त्री

(१) भूमिस्थाऽपि या त्वं रमणेत्यादिभिः संबोधनैः संबोधनवाक्यैः मां दृशां स्वर्गमधिरोपितवत्यसि तादृशेन त्वद्वाक्येनाहं स्वर्गसुखमन्वभवमित्यर्थः। रूढेर्गत्युप्रसर्ज्जनार्थतया गत्यर्थत्वात् प्रयोज्यकर्तुः कर्मत्वम्। सा त्वं स्वर्गं गतास्यधुना भूमिधूलिषु कथमिव क्षिपसि पूर्व्वं भूमिस्थयापि उत्कृष्टस्थानासादनेन लब्धमिदानीमुत्कृष्टस्थलस्थया अत्युत्कृष्टस्थलासादनमनुचितं तदविधायि अधरस्थाने क्षेपणं नितान्तमनुचितं तवेत्यर्थः त्वद्विरहे धरण्यौ पतित्वा रोदिमीति ध्वन्यते।

(२) सुवर्णवरया सुवर्णादप्युत्कृष्टया कान्त्या, परया शुद्ध्या दोषराहित्ये न च स्विकाः स्वकीयाः दहनस्येत्यर्थात् शिखाः क्षिपन्तीमभिभवन्तीं त्वां कोपकलुषः स्वकान्तिशुद्धिभ्यां जयजनितक्रोधेन प्राप्तैर्ष्यः दहनः अग्निर्ददाह इति ज्ञाने उत्प्रेक्षे।

Digitized by Google

फुल्लाम्बुजस्रगिव कण्ठसुखैकहेतुः ।
चेतश्चमत्कृतिपदं कवितेव रम्या
नम्या नरीभि (१) रमरीव हि सा विरेजे ॥ १६ ॥
स्वप्नान्तरेऽपि खलु भामिनि ! पत्युरन्यं
या दृष्टवत्यसि न कञ्चन साभिलाषम् ।
सा सम्प्रति प्रचलितासि गुणैर्विहीनं
प्राप्तुं कथं कथय हन्त परं पुमांसम् (२) ॥ १७ ॥
रीतिं गिरामसृतवृष्टिकिरां त्वदीयां
ताञ्चाकृतिं कृतिवरैरभिनन्दनीयाम् ।
लोकोत्तरामथ कृतिञ्च सुधारसार्द्रां
स्रोतुं न कस्य समुदेति मनःप्रसादः ॥ १८ ॥

इति श्रीमत्पण्डितराजजगन्नाथकृते भामिनीविलासे
करुणो नाम तृतीयो विलासः ।

---

(१) कर्पूरवर्त्तिः कर्पूरचूर्णमिश्रितशलाकेव । सा हि नेत्रार्पिता सती नेत्रतापं क्षिणोति वैद्यकप्रसिद्धं तद्वत् नेत्रप्रीतिकरी चेतसः मनसः चमत्कृतिपदं आनन्दविशेषास्पदं कवितेव नरीभिः नरजातिस्त्रीभिर्नम्या नमस्या अमरीव अप्सरा इव विरेजे । नरीत्यत्र नरशब्दात् जातौ ङीप् ऋशब्दात्तु निपातनात् नारीति विशेषः ।

(२) गुणैः विनयादिभिः धर्म्मशास्त्रैश्च विहीनं शून्यं परमन्यम् उत्तमञ्च पुमांसं पुरुषं प्राप्तुं प्रचलिता यातासि कथय किमेतत्त्वयोचितमिति शेषः । मां परित्यज्य साध्वग्रास्तव परपुरुषदर्शनमप्यनुचितं किमुत तत्प्राप्त्यर्थं गमनमिति भावः ।

Digitized by Google

विशालविषयाटवीवलयलग्नदावानल-
प्रसृत्वरशिखावलीविकलितं मदीयं मनः ।
अमन्दमिलदिन्दिरे निखिलमाधुरीमन्दिरे
मुकुन्दमुखचन्दिरे चिरमिदं चकोरायताम् (१) ॥ १ ॥
अये ! जलधिनन्दिनीनयननीरजालम्बन !
ज्वलज्ज्वलनजित्वरज्वरभरत्वराभङ्गुरम् ।
प्रभातजलजोज्झदृग्द्विरमगर्व्वसर्व्वङ्कषै-
र्जगन्मितथरोचनैः शिशिरयाशु मां लोचनैः (२) ॥ २ ॥
स्मृतापि तरुणातपं करुणया हरन्ती नृणाम्
अभङ्गुरतनुत्विषां वलयिता व्रतैर्विद्युताम् ।
कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी-
मदीयमतिचुम्बिनी भवतु काऽपि कादम्बिनी(१) ॥ ३ ॥
कलिन्दनगनन्दिनीतटवनान्तरं भासयन्

---

(१) अमन्दं यथा तथा मिलन्ती इन्दिरा लक्ष्मीर्यत्र मुखमेव चन्द्रिरश्चन्द्रमाः तस्मिन् । चदेः किरच् । चकोरायताम् चकोर इवाचरतु आचारार्थे क्यङ् ।

(२) हे जलधिनन्दिनीनयननीरजालम्बन ! कमलानेत्रपद्मप्रीत्याश्रय ! ज्वलतः ज्वलनस्य वह्नेर्जित्वरस्य ज्वरस्य चिन्ताज्वरस्य भरत्वरया अतिशयितवेगेन भङ्गुरं अतिचिन्ताज्वराकुलमित्यर्थः प्राभातकालिकस्य जलजस्य उज्झतः उद्यतः गरिमण्णः गर्व्वस्य सर्व्वङ्कषैः नाशकैः जगतां मितयस्य रोचनैः प्रीतिकारकैः लोचनैः शिशिरय शीतलं कुरु । ज्वलर्थे णिच् प्रार्थनायां लोट् ।

(३) अन्या भेषजमाला दर्शनेन छायया वा जनानां तापहन्त्री इयन्तु स्मृतापि इति व्यतिरेकः । कलिन्दगिरिनन्दिनी यमुना ।

Digitized by Google

सदा पथि गतागतश्रमभरं हरन् प्राणिनाम्। (१)
लतावलिग्रथितो मधुरया रुचा सम्भृतो
ममाशु हरतु श्रमानतितरां तमालद्रुमः॥ ४॥
अगज्जालं ज्योत्स्नामथनवसुधाभिर्जटिलयन्
जनानां सन्तापं त्रिविधमपि सद्यः प्रशमयन्
श्रितो वृन्दारण्यं नतनिखिलवृन्दारकवृतो-
मम स्वान्तध्वान्तं तिरयतु नवीनो जलधरः॥ ५॥
ग्रीष्मचण्डकरमण्डलभीष्मज्वालसंसरणतापितमूर्त्तेः (२)।
प्रावृषेण्य इव वारिधरो मे वेदनां हरतु वृष्णिवरेण्यः॥ ६॥
अपारे संसारे विषमविषयारण्यसरणौ
मम भ्रामं भ्रामं विगलितविरामं जडमतेः।
परिश्रान्तस्यायं तरणितनयातीरनिलये
समन्तात् सन्तापं हरिनवतमालस्तिरयतु॥ ७॥
आलिङ्गितो जलधिकन्यकया सलीलं
लग्नः प्रियद्रुलतयेव तरुस्तमालः (३)।

---

(१) पथि संसारमार्गे प्राणिनां गतागतश्रमम् अनवरतगतिखेदं हरन् लतानां तन्तुत्वेन तत्सदृशीनां गोपाङ्गनानामावलिग्रथितेनाहृतः तमालद्रुमः। तद्-च्छ्यामरूपोहरिः श्रमान् दूरगमनागमनजन्यखेदान् अतितरां हरतु उन्मूलयतु।

(२) ग्रीष्मचण्डकरमण्डलमिव उग्रकालसूर्यबिम्बमिव भीष्मा ज्वाला शिखा यस्य तादृशेन संसरणेन तापितमूर्त्तेर्मम वेदनां प्रावृषेण्यः प्रावृड्भवः मेघ इव श्यामः हरतु।

(३) जलधिकन्यया लक्ष्म्या आलिङ्गितः गोपिकया प्रियद्रुलतयेव सुवर्णवर्णत्वात् लग्नश्च तमालद्रुमरूपो हरिर्मम हृदये चकास्तु।

Digitized by Google

देहावसानसमये हृदये मदीये
देवस्त्वकास्तु भगवानरविन्दनाभः ॥ ८ ॥
नयनानन्दसन्दोहतुन्दिलीकरणक्षमा (१)
तिरयतान्न सन्तापं कापि कादम्बिनी मम ॥ ९ ॥
वाचा निर्म्मलया सुधामधुरया यां नाथ ! शिक्षामदा-
स्तां स्वप्नेऽपि न संस्मरामयहमहम्भावावृतो(२) निस्त्रपः ।
दूत्यागःशतशालिनं पुनरपि स्त्रीयेषु मां बिभ्रत-
स्त्वत्तो नास्ति दयानिधिर्यदुपते ! मत्तो न मत्तः परः ॥१०॥
पातालं व्रज, याहि वा सुरपुरीमारोह मेरोः शिरः,
पारावारपरम्परां तर, तथाप्याशा न शान्ता तव ।
आधिव्याधिपराहतो यदि सदा क्षेमं निजं वाञ्छसि
श्रीकृष्णेति रसायनं रसय रे मूढ्यैः किमन्यैः श्रमैः(३) ॥११॥
गणिकाजामिलमुख्यानवता भवता वताहमपि सीदन् ।
भवमरुगर्त्ते करुणामूर्त्ते ! न च सर्व्वथोपेक्ष्यः ॥१२॥

---

(१) तुन्दिलीकरणे पोषणे क्षमा समर्था ।

(२) निर्म्मलया प्रमादादिदोषशून्यया अतएव सुधामधुरया मोक्षसाधनत्वेन अमृततुल्यया वाचा वेदरूपया गिरा यां शिक्षामदाः दत्तवानसि अहम्भावावृतः देहादिषु अहमिति चिन्तान्वितः अहं भवदुपदेश-विचारशून्यात् निस्त्रपः निर्लज्जः तथापि स्त्रीयेषु स्वकीयदासजनमध्ये अपराधशतकारिणमपि मां बिभ्रतः पालयतस्त्वत्तः भवत्सकाशात् परः अन्यः उत्कृष्टस्य दयानिधिर्नास्ति मत्तः परः मदन्यः न मत्तः प्रमादान्वितः कृत्याकृत्यविवेकशून्यः नास्तीत्यर्थः ।

(३) मूढ्यैः विफलैः अन्यैः श्रमैः किं तत् साध्यं नास्तीत्यर्थः ।

Digitized by Google

विदित्वेदं दृश्यं विषमरिपुदुष्टं नयनयो-
र्विधायान्तर्मुद्रामथ सपदि विद्राव्य विषयान्।
विधूयान्तर्ध्वान्तो मधुरमधुरायां चिति कदा
निमग्नः स्यां कस्याश्चन नवनभस्याम्बुदरुचौ (१)॥ १३॥
महीका रसिता सिता समगिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाऽप्यधायि कतिधा रम्भाधरः खण्डितः।
सत्यं ब्रूहि मदीयजीव! भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः? (२)॥ १४॥
वज्रं पापमहीध्रतां भवगदोद्रेकस्य सिद्धौषधं
मिथ्याज्ञाननिशाविशालतमसध्वंसांशुबिम्बोदयः।
स्फुर्जत्क्लेशमहीरुहामुरुतरज्वालाजटालः (३) शिखी
हारं निर्हृतिमन्मनो विजयते कृष्णेति वर्णद्वयम्॥ १५॥
रे चेतः! कथयामि ते हितमिदं वृन्दावने चारयन्
वृन्दं कोऽपि गवां नवाम्बुदनिभो बन्धुर्न कार्य्यस्त्वया।
सौन्दर्य्याद्भुतमुद्गिरद्गिरभितः संमोह्य (४) मन्दस्मितै-

---

(१) नभस्यस्य भाद्रपदमासिकस्याम्बुदस्य मेघस्य तत्सभा रुचिः कान्तिस्तस्याम्।
(२) मधुरिमोद्गारः माधुर्यातिशयः क्वचित् क्वचितः आस्वादितः।
(३) गुरुतरा अतिगुर्वी या ज्वाला शिखा तया जटालः जटायुक्तः शिखी वह्निः स्फुर्जत्क्लेशमहीरुहाम् अनुभूयमानदुःखरूपवृक्षाणां दाहकत्वात् वह्नित्वम्।
(४) एष भक्त्यादिना कृतबन्धुभावः हरिः त्वां तव वल्लभान् प्रियान् विषयान् शब्दादींश्च त्यजं नेष्यति ज्ञानजनकेन अज्ञाननिवर्त्तनात् तन्मूलकम् अहङ्कारं ममकारं च नाशयतीत्यतः जीवभावापनोदनात् तव, ममकारनाशनाच्च प्रियाणां नाशकत्वमिति भावः।

Digitized by Google

रेष त्वां तव वल्लभांश्च विषयानाशु त्वयं नेष्यति ॥ १६ ॥
अव्याख्येयां वितरति परां प्रीतिमन्तर्निमग्ना
कण्ठे लग्ना हरति नितरां यान्तरध्वान्तजालम् (१)।
तां द्राघीयैरपि बहुमतां माधुरीमुद्गिरन्तीं
कृष्णेत्याख्यां कथय रसने! यद्यसि त्वं रसज्ञा ॥ १७ ॥
सन्त्येवास्मिन् जगति बहवः पक्षिणो रम्यरूपा-
स्तेषां मध्ये मम तु महती वासना चातकेषु ।
यैरध्वन्यैरथ निजसखं नीरदं स्मारयन्ति-
श्चित्तारूढं भवति किमपि ब्रह्म कृष्णाभिधानम् (२) ॥ १८ ॥
विष्वग्द्रीच्या भुवनमभितो भासते यस्य भासा
सर्व्वेषामप्यहमितिधियां मूढमालम्बनं (३) यः ।

---

(१) या कृष्णेत्याख्या कण्ठे लग्ना सतामान्तराध्वान्तर्भवानां ध्वान्तानाम-ज्ञानतिमिराणाम् जालं समूहं हरति निवारयति। द्राघीयैरपि बहुमतां ततोऽप्यधिकामित्यर्थः माधुरीमतिमाधुर्य्यम् उद्गिरन्तीं प्रकाशयन्तीम्। हे रसने! तदा कृष्णेत्याख्यां कथय यदि रसज्ञा रसविशेषज्ञा। अन्यस्य रस-स्यास्वादनात् प्रीतिकरत्वम् अस्य तु पुनराख्यानमात्रात्, तत्रापि मानसाज्ञानकारणनाशित्वञ्चेति व्यतिरेको व्यज्यते।

(२) चातकैः अध्वन्यैः प्रत्यक्षीकृतैः निजसखं प्रीतिकारित्वात् स्वबन्धुं नीरदं मेघं स्मारयद्भिः स्मारकैः। तथाच एकसम्बन्धिज्ञानस्यापरसम्बन्धि-स्मारकत्वसिद्धान्तात् चातकदर्शनेन ततप्रीणनमेघस्मरणं तेन च ततसदृश-रूपकृष्णमूर्त्तेरपि स्मरणमतः कृष्णरूपस्मारकचातकेषु महती वासना संज्ञानना प्रीतिरिति यावत्।

(३) विष्वग् अञ्चतीति विष्वद्रीची सर्व्वव्यापिनी तया यस्य भासा प्रकाशरूप-चैतन्येन भुवनं भासते प्रकाशते "तमेव भान्तमनुभाति सर्व्वं तस्य भासा सर्व्वमिदं विभातीति" श्रुतौ तस्य भासैव सर्व्वभानप्रतिपादनात्। यश्च विष्णुः अहमितिधियां अहमित्याकारकज्ञानवतां सर्व्वेषां मूढम् अर्वाग्-

Digitized by Google

तं पृच्छन्ति स्वहृदयमतो वेदिनो विष्णुमन्या-
नन्यायोऽयं शिव ! शिव ! कृपां केन वा वर्णनीयः ॥ १९ ॥
सेवायां यदि साभिलाषमसि रे लक्ष्मीपतिः सेव्यतां
चिन्तायामसि सस्पृहं यदि तदा चक्रायुधश्चिन्त्यताम् ।
आलापं यदि वाञ्छसि स्मररिपोर्गाथा तदालप्यतां
स्वापं वाञ्छसि चेन्निरर्गलसुखे चेतस्तदा सुप्यताम्(१) ॥२० ॥
नवग्रीष्मप्रौढ़ातपनिवहसन्तप्तवपुषो
बलादुन्मूल्य द्राङ्निगड़मविवेकव्यतिकरम् ।
विशुद्धेऽस्मिन्नात्मामृतसरसि नैराश्यगिरिरे
विहङ्गास्ते दूरीकृतकलुषजालाः सुकृतिनः (२) ॥ २१ ॥

दृश्यां विवेकेन निर्धेतुमशक्यम् आलम्बनं अधिष्ठानम् निरधिष्ठानभ्रान्तृपत्तेः रजतस्थानाधिष्ठानशुक्तिकावत् सकलाहङ्कारस्थानाद्यधिष्ठानं ब्रह्म इत्यर्थः । अतो वेदिनः स्वहृदयाधिष्ठानत्वेन विष्णुं ज्ञातवन्तोऽपि ज्ञापनार्थमन्यान् जनान् विष्णुं स्वहृदयम् स्वहृदयाधिष्ठानं पृच्छन्ति कोऽसौ विष्णुरिति नियुञ्जते अयमन्याय्योऽनुचितः । पृष्टोऽपि केन ? प्रकारेण तस्य स विष्णुर्वर्णनीयो भवेत् "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहेति श्रुत्या विष्णोर्वाग्विषयत्वस्य प्रतिषेधात् तस्य कथं वर्णनीयता स्यात् यदर्थज्ञापनाय पृच्छा क्रियते इत्यर्थः ।

(१) निरर्गलं निरतिशयं सुखं तत्स्वरूपे परमात्मनि सुप्यतां विषयान्तरराहित्येन निश्चेष्टतया क्षीयतामित्यर्थः ।

(२) नवा ग्रीष्मप्रौढ़ातपा ग्रीष्मप्रचण्डरौद्राणि तन्निवहेन सन्तप्तं वपुर्येषां तादृशास्ते सुकृतिनः सुकृतवः विहङ्गाः, अविवेकव्यतिकरम् अज्ञानसम्बन्धरूपं निगड़ं बन्धं द्राक् शीघ्रमुन्मूल्य विनाश्य विशुद्धे कालुष्यादिदोषरहितेऽस्मिन् प्रत्यक्षानुभवविषये नैराश्येन आशाभूम्यतया गिरिरे शीतले आनन्दहेतुतया सुखजनके इत्यर्थः । आत्मा अमृतसर एव तस्मिन् दूरीकृतं कलुषरूपं जालं यैः तादृशाः सन्तः निमग्नाः भवन्तु इति शेषः ।

Digitized by Google

बन्धोन्मुक्तौ खलु मखमुखान् कुर्वते कर्मपाशान्
अन्तःशान्त्यै मुनिशतमतानल्पचिन्तां भजन्ति ।
तीर्थे मज्जन्त्यशुभजलधेः पारमारोढुकामाः
सर्व्वं प्रामादिकमिह भवे भ्रान्तिभाजां नराणाम् (१) ॥२२॥
प्रथमं चुम्बितचरणा जङ्घाजानूरुनाभिहृदयानि ।
आलिङ्ग्य भावना मे खेलतु विष्णोर्मुखाब्जमीषायाम् ॥ २३ ॥
मलयानिलकालकूटयो रमणीकुन्तलभोगिभोगयोः ।
श्वपचात्मभुवोर्निरन्तरा मम भूयात् परमात्मनिश्चितिः(२)॥२४

निखिलं जगदेव नश्वरं (३)
पुनरस्मिन् नितरां कलेवरम् ।
अथ तस्य कृते कियानयम्
क्रियते हन्त जनः परिश्रमः ॥ २५ ॥

---

(१) मखो यज्ञः मुखं द्वारं येषां तादृशान् कर्म्माणि कर्म्मजन्याहृष्टानि पाशा बन्धनसाधनरज्जव इव तान् बन्धोन्मुक्तौ पाशबन्धमोचनाय कुर्व्वते तथा च बन्धसाधनस्य बन्धनोन्मोचनार्थमाचरणं भ्रान्तिमूलमित्यर्थः । मुनिशतस्य मतेषु तदुक्तार्थेषु अनल्पचिन्ताम् अधिकचिन्ताम् अन्तःशान्त्यै भजन्ति तदपि भ्रान्तिमूलम् । अशुभं जलधिरिव ततुपारमारोढुकामाः अशुभकर्म्मरूपसमुद्रं तरीतुकामा इत्यर्थः मज्जन्ति तदपि भ्रान्तिमूलम् । इत्येतत् सर्व्वं प्रामादिकम् अनवधानजातं विवेकशून्यमित्यर्थः तथा च सर्व्वकर्म्माणि परित्यज्य आत्मानुसरणमेव श्रेय इत्यर्थः ।

(२) श्वपचात्मभुवोः चण्डालचतुर्मुखयोर्निरन्तरा निर्विशेषा परमात्मनिश्चितिः परमात्मनिश्चयः मम भूयात् "सर्व्वं खल्विदं ब्रह्म" इत्युक्तेः श्वपचादिभेदराहित्येन सर्व्वेषु ब्रह्माभिन्नताबोध उचितः । भूयादित्यत्र आशीर्लिङ् ।

(३) निखिलं जगत् नश्वरं नाशयोग्यं तन्मध्ये कलेवरं देहोऽपि नितरां सुतरां तथा नश्वरम् अतस्तत्कृते क्लेशस्वीकरणमनुचितमिति भावः ।

Digitized by Google

प्रतिपलमखिलान्लोकान् मृत्युमुखं विशतोऽपि निरीक्ष्येह।
हा हन्त किन्नु चित्तं विरमिति नाद्यापि विषयेभ्यः ? ॥२६॥

सपदि विलयमेतु राज्यलक्ष्मी-
रुपरि पतन्त्वथ वा कृपाणधाराः।
अपहरतुतरां शिरः कृतान्तो
मम तु मतिर्न मनागपैतु धर्म्मात् ॥ २७ ॥

अपि बहुलबलं मूर्द्धनि रिपुरेव निरन्तरं भ्रमतु।
पातयतु वासिधारामहमणुमात्रं न किञ्चिदपभाषे ॥ २८॥

तरणोपायं पश्यन्नपि मामक ! जीव ! तामसि कुतस्त्वम् ?।
चेतः सरणौ किन्ते ? नायाति कदापि नन्दसुतः ॥ २९ ॥

श्रियो मे मा सन्तु क्षणमपि च माद्यद्गजघटा-
मदभ्राम्यद्भृङ्गावलिमधुरहुङ्कारसुभगाः।
निमग्नानां यासु द्रविणरयपर्य्याकुलधियां
मनः सेवाकार्य्ये हरिचरणयोर्नैव रमते (१) ॥ ३० ॥

किं निःशङ्कं शेषे ? शेषे वयसः समागतो मृत्युः (२)।
अथ वा सुखं शयीथा निकटे जागर्त्ति जाह्नवी जननी ॥ ३१ ॥

सन्तापं किं कलयसि धावंधावं धरातले हृदय !।
अस्ति मम शिरसि सततं नन्दकुमारःप्रभुः परमः ॥ ३२ ॥

---

(१) यासु श्रीषु सम्पत्तिषु निमग्नानाम् अत एव द्रविणस्य रयेण वेगेन तन्मदेनेत्यर्थात् पर्य्याकुला व्याकुला धीर्येषां तेषां धनिनामित्यर्थः सेवाकार्य्ये सेवानुकूल्ये एव। एवार्थो गम्यः। रमते न हरिचरणयोः रमते।

(२) शेषे स्वपिषि, शेतेर्लटि मध्यमपुरुषैकवचनरूपम्।

Digitized by Google

रे रे मनो ! मम मनोभवघातनस्य
पादाम्बुजद्वयमनारतमानम त्वम् ।
किं मां निपातयसि संसृतिगर्त्तमध्ये ?
नैतावता तव गमिष्यति पुत्रशोकः (१) ॥ २३ ॥
मरकतमणिमेदिनीप्ररोह-
स्तरुणतरस्तरुरेष वा तमालः ।
रघुपतिमवलोक्य तत्र दूरा-
दृषिनिकरैरिति संशयस्तदापि (२) ॥ २४ ॥
तरणितनया किं स्यादेषा, ? न, तोयमयी (३) हि सा
मरकतमणिज्योत्स्ना वा स्यान्न सा मधुराकृतिः ।
इति रघुपतेः कायच्छाया विलोकनकौतुकै-
र्वनवसतिभिः कैः कैरादौ न सन्दिदिहे जनैः ? ॥ २५ ॥
चपला जलदाच्छ्राता, लता वा

---

(१) मनोभवस्य कामस्य घातनस्य नाशकस्य मुरारेः शिवस्य । पुत्रशोकं कामभरत्वजन्यशोकं कामस्य मनोजातत्वात् तत्पुत्रत्वम् तथा च मम संसारगर्त्तपातने तव पुत्रशोकापनयनं न भवेत् अतः मुरारेः वैरप्रतीकारकरणाय तत्प्रवधमन्मनस्तोऽपनयनेन मां न पातयेत्यर्थः ।

(२) दूरात् रघुपतिमवलोक्य तत्र जनकसंसदि मुनिनिकरैरित्यम् ईदृशः संशयः तदा अपि प्राप्तः । संशयस्वाकारस्तु प्रथमार्द्धे उक्तः ।

(३) एषा प्रत्यक्षदृश्यमाना रघुपतेः तनुच्छाया तनुकान्तिः । किं तरणितनया यमुना स्यात् ? इत्याशङ्क्य तां निवारयति नेति नैषा यमुना, हि यतः सा जलमयी एषा तु न तथेति जलमयत्वाभावेन यमुनाभावोऽग्रहतः । एवं मरकतमणिज्योत्स्ना कान्तिर्वा स्यादित्याशङ्क्य सा न मधुराकृतिः दृश्यन्तु तथा, तथा च मधुराकृतित्वेन न मरकतकान्तिरित्यर्थः इति दृश्यम् कैः कैः अपि तु सर्वैः वनवसतिभिर्जनैः आदौ न सन्दिदिहे ? ।

Digitized by Google

तरुमुख्यादिति (१) संशये निमग्नः।
गुरुविश्लेषितैः कपिर्मनीषी
निरधैषीदथ तां वियोगिनीति ॥ ३६ ॥

भूतिर्नीचगृहेषु, विप्रसदने दारिद्र्यकोलाहलो,
नाशो हन्त सतामसत्फलजुषामायुः, समानां शतम्।
दुर्नीतिं तव वीक्ष्य कोपदहनज्वालाजटालोऽपि सन्
किं कुर्वे? जगदीश! यत् पुनरहं दीनो भवानीश्वरः(२)॥ ३७॥

आ मूलादूलसानोर्मलयवलयिताद्रा च कूलात् पयोधे
र्यावन्तः सन्ति काव्यप्रणयनपटवस्ते विशङ्कं वदन्तु।
मद्दीकामध्वनिर्यन्मसृणमदधुरीमाधुरीभाग्यभाजां
वाचामाचार्य्यताया: पदमनुभवितुं कोऽस्ति धन्यो मदन्यः?॥ ३८॥

गिरां देवी वीणागुणरणनहीनादरकरा
यदीयानां वाचामहृतमधमाधमति रसम्।
वचस्तस्याकर्ण्य श्रवणसुभगं पण्डितपते-
रधुन्वन् मूर्द्धानं नृपशुरथ वायं पशुपतिः (३) ॥ ३९ ॥

---

(१) चपला विद्युत् जलदाल्लेषात् च्युता अथ वा, लता तरुमुख्यात् द्रुमश्रेष्ठात् च्युतेत्यनुषङ्गः। इति हेतोः संशये निमग्नः कपिर्हनुमान् तां सीतां गुरुनिश्लेषितैः चिन्ताजनितश्वासमारुतैः वियोगिनीति प्रतिविच्छेदशालिनीति निरधैषीत् निश्चिकाय।

(२) समानां वत्सराणां शतं यावत् आयुः जीवनकालः। इति तव दुर्नीतिं कोपाग्नियुक्तोऽपि अहं किं कुर्वे? हे जगदीश! यद्यस्मात् अहं दीनः तव अलत्यकार्य्यप्रतीकाराय असमर्थः, भवान् पुनः ईश्वरः यथेष्टकार्य्यकारी स्वतन्त्रश्च अतः न किञ्चित् कर्त्तुं शक्नोमीति भावः।

(३) तस्य पण्डितपतेः पण्डितवरस्य अमेत्यर्थात् अमेत्यनुक्त्या तयोक्तिर्मर्वश्च-

Digitized by Google

मद्वाणि ! मा कुरु विषादमनादरेण
मात्सर्य्यमग्नमनसां सहसा खलानाम् ।
काव्यारविन्दमकरन्दमधुव्रतांस्त्व-
मास्येषु धास्यसितमां कियतो विधालान् (१) ॥ ४० ॥

विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः ।
आस्ये धास्यति कस्य ? लास्यमधुना धन्यस्य कामालस-
खर्व्वामाभ्रमाधुरीं विधुरयन् वाचां वि लासो मम(२) ॥ ४१ ॥

मधु द्राक्षा साक्षादमृतमथ वामाधरसुधा
कदाचित् केषाञ्चित् खलु हि विदधीरन्नपि मुदम् ।
ध्रुवं ते जीवन्तोऽप्यहह मृतका मन्दमतयो
न येषामानन्दं जनयति जगन्नाथभणितिः ॥ ४२ ॥

निर्म्माणे यदि मार्म्मिकोऽसि नितरामत्यन्तपाकद्रवन्-
मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां गिराम् ।

नार्या दैत्यं श्रवसुभगं स्तुतिसुखदं वचः काव्यरूपमाकर्ण्य ना पशुरिव मूढत्वात् रूपशुः पशूनां पतिर्गोपालो वा मूर्द्धानमधुन्वन् विक्षवानाविष्टतया शिरोऽचालयन् आस्ये तथा च रूपशुर्गोपालो वा दैत्यवाक्यरसास्वादानभिज्ञः । तेन रूपशुं गोरक्षकं हित्वा सर्व्वेषां विक्षय इति भावः ।

(१) कियतोऽपि विधालान् बहून् काव्यारविन्दरसरूपमकरन्दस्वादाभिज्ञान् मधुव्रतान् सहृदयान् त्वम् आस्येषु धास्यसितमाम् अतिशयेन त्वां धारयन्ति इति कर्म्मकर्म्मण्यण्यदः ।

(२) कामालसानां खर्व्वाभानां खर्वलयोधितास् भ्रमराधुरीम् अतिमाधुर्य्यं विधुरयन् निराकुर्व्वन् मम वाचां विलासः कविताप्रबन्धः कस्य धन्यस्य आस्ये वासं धास्यति ?

Digitized by Google

काव्यं तर्हि सखे ! सुखेन कथय त्वं सम्मुखे मादृशां
मा चेदुष्कृतमात्मना कृतमिव खान्ताद्बहिर्मा कृथाः(१) ॥४३॥
माधुर्य्यैरपि धुर्य्यैर्द्राक्षाक्षीरेक्षुमाक्षिकादीनाम् ।
बन्ध्येव माधुरीयं पण्डितराजस्य कवितायाः (२)॥ ४४ ॥
आस्वाद्याकलितानि नित्यविधयः सर्व्वेऽपि सम्भाविताः
दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः ।
सम्प्रत्युज्झितमासनं, मधुपुरीमध्ये हरिः सेव्यते
सर्व्वं पण्डितराजराजिजितिलकेनाकारि लोकाधिकम् ॥ ४५ ॥
दुर्वृत्ता जारजन्मानो हरिष्यन्तीति शङ्कया ।
मदीयपद्यरत्नानां मञ्जूषैषा मया कृता ॥ ४६ ॥

इति श्रीमत्पण्डितराजजगन्नाथविरचिते भामिनीविलासे
भान्तो नाम चतुर्थो विलासः ।

सम्पूर्णमिदम् ।

---

(१) अत्यन्तपाकेन अतिशयपाकपरिणामेन द्रव्यान्तरं लड्डीकादयो द्राक्षादयो मधुमाधुरी मधुरसमाधुर्यं तस्या मदस्य गर्व्वस्य परीहारे निवारणे उद्धुराणां समर्थानाम् गिरां निर्म्माणे यदि मार्म्मिकोऽसि मर्म्मभिज्ञः तदा यादृशं मदीयं काव्यं यदि कचिद्दृष्टं, श्रुतं, ज्ञातं वा तत् कथय अथ चेत् यदि तत् दुष्कृतं दोषयुक्ततया ज्ञातं तदा आत्मना ज्ञातं दुष्कृतं पापमिव स्वान्तात् अन्तःकरणात् न बहिः कृथाः मा कुरु । तथाच मत्कृतकाव्यसदृशमन्यत् दोषरहितं काव्यं नास्तीत्यर्थः ।

(२) पण्डितराजस्य कवितायाः धुर्य्यैः प्रशस्यैर्माधुर्य्यैः द्राक्षादीनां माधुरी माधुर्यं बन्ध्यैव जाता तत्कवितामाधुर्य्यं द्राक्षादिभ्योऽधिकमिति भावः ।

(३) पण्डितराजेन रसगङ्गाधरादौ उदाहरणानुरूपा बहवः श्लोका निर्म्माय प्रदर्शिताः तेषां च अन्याङ्कितत्वख्यापनाय स्वकृतश्लोकानाम् अन्यैरात्मकृतत्व-

Digitized by Google

ख्यापनपरिहाराय च एकत्र सङ्कलनात् रत्नानामिव काव्यानां म
रूपा एतत् भामिनीविलासाख्यमुत्कृष्टं काव्यं कृतमित्याह दुर्वृत्ता इ
जारजन्मानः अन्यस्त्रियामन्यजाताः अन्यकृतं स्वकृतत्वेन कृरि
ख्यापयिष्यन्ति इति शङ्कया एषा मञ्जूषा कृतेत्यर्थः । मञ्जूषा पेटः
वस्तुभेदः विधेयप्राधान्यात् स्त्रीत्वनिर्देशः भामिनीविलासं मञ्जूष
मित्यर्थः ।

इति गवर्षमेण्ट-संस्कृतपाठशालाध्यापक-श्रीतारानाथतर्कवाचस्पति
भट्टाचार्यकृतं भामिनीविलासव्याख्यानं समाप्तम् ।

वात्स्यवंशावतंसस्य कालिदासविदः सुतः ।
श्रीतारानाथशर्मेदं व्याकरोदतियत्नतः ॥
याकेऽदोऽग्न्यङ्कवाहेन्दुमिते व्याख्याय संस्कृतम् ।
सुप्रचाराय लोकेऽस्मिन् सुद्रामन्त्रेण योजितम् ॥

याके १७९२ ।

Digitized by Google

Digitized by Google

THE FOLLOWING IS THE LIST OF
Professor Tarkavachaspati's
WORKS & PUBLICATIONS.

		Rs.	As.
1.	Asubodham Vyakaranam.	3	4
2.	Dhaturupadarsha.	2	,,
3.	Sabdastoma Mahanidhi.	10	,,
4.	Sidhantakoumudi with Sarala.	11	,,
5.	Sidhantavindusara.	,,	8
6.	Tuladanadipadhati.	4	,,
7.	Gaya Shradhadipadhati.	5	,,
8.	Sabdartharatna.	,,	12
9.	Vakyamanjari.	,,	4
10.	Vrittaratnakara and Chhandomanjari with notes	,,	10
11.	Venisanhara with a Commentary. ...	1	,,
12.	Mudrarakshasa. Ditto	1	8
13.	Ratnavali Ditto	1	8
14.	Malavikagnimitra. Ditto	1	8
15.	Dhananjayavijaya. Ditto	,,	4
16.	Mahaviracharita. Ditto	1	8
17.	Sankhyatatwakoumudi Ditto	2	8
18.	Veiyakarana Bhusanasara.	2	,,
19.	Lilavati.	,,	12
20.	Vijaganita.	1	,,
21.	Sishupalabadha with Mallinatha. ...	6	,,
22.	Kiratarjuniya. Ditto	2	8
23.	Kumarasambhava Purvakhandam. Ditto ...	1	,,
24.	Kumarasambhava Uttarakhandam. ...	,,	8
25.	Panini Sutra.	,,	12
26.	A comprehensive Sanscrit Dictionary (In the Press)	60	,,
27.	Kadambari with the commentary. ...	4	,,
28.	Rajaprasasti.	,,	2
29.	Gayitri.	...	
30.	Anumanachintamanididhiti.	2	8
31.	Sarvadarshanasangraha.	2	,,
32.	Bhaminibilasa with notes.	1	,,
33.	Hitopodesha with notes.	1	,,
34.	Bhasha parichheda and Muktavali. ...	1	,,
35.	A discourse on the Hindu polygamy. ...	,,	4
36.	Dashakumaracharita with notes. ...	1	8
37.	Paribhashendusekhara.	1	8
38.	Kavikalpadruma.	,,	8
39.	Chakradatta.	2	8
40.	Unadisutra. with a commentary.	2	,,

Apply to Pandit Jibananda Vidyasagara B. A.

The 1st March 1872. } *Govt. Sanskrit College.* Calcutta.

Digitized by Google

Digitized by Google

Digitized by Google



Digitized by Google

BUCHBINDEREI
LEO HUFNAGEL
MÜNCHEN